M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1148

Title: Kavya Sangraha

1348

Incomplete

Krutya Sangraha	Title
	Author
	Editor
	Year, Vols.
	Publisher
1348	Remarks

कृ.टी पुरीषे वाम्यकर्णके । धारयेद्दक्षसूत्रं तु मैथुने तूपवीतवत् । कर्णनिधानं ब्रह्मचारिविषयमि
तिकेचित् । विष्णुः । अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा । वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वा
२ सवर्जितः । दिवा संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः । कुर्यान्मूत्रपुरीषे च रात्रौ च दक्षिणामु
खः । मनुः । छायायामंधकारे वा रात्रावहनि वा द्विजः । यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च
फालकृष्टे जले चित्यां वल्मीके गिरिमस्तके । देवालये नदीतीरे दर्भपुष्पेषु शाद्वले ॥ सेव्यछाये
वृक्षेषु मार्गे गोष्ठांबुभस्मसु । अग्नौ चैव तिष्ठन् गच्छंश्च विष्टामूत्रं च नोत्सृजेत् । वाय्वग्न्य
र्कस्त्रीगोसोमसंध्यांबुस्त्रीद्विजन्मनः । प्रत्यङ्मुखश्चैतानि विण्मूत्रं च नोत्सृजेत् । मनुः ।
अरण्ये तु पदे रात्रौ चौरव्याघ्राकुले पथि । कृत्वा मूत्रपुरीषं तु द्रव्यहस्तो न दुष्यति । काष्ठादिना
तृणपानस्थममेध्यं निर्मार्जीतवै । कंदमूलफलांगारैर्नामेध्यं निर्मार्जीतवै ॥ इति मूत्रपुरी ॥२॥
षोत्सर्गविधिः ॥ अथ शौचविधिः ॥ ॥ शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः । शौ
चाचारविहीनस्य समस्ता निःफलाः क्रियाः । तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा । रात्रि

मात्रं जलं त्यक्त्वा कार्यं शौचमनुद्धृते । शौचद्वये प्राप्ते आदौ मूत्रशौचं पश्चाद्विट्शौ
चमिति चंद्रिकायां साधितं । गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः । अंतर्जले दे
वगृहे वल्मीके मूषकस्थले । कृतशौचावशिष्टाश्च न ग्राह्याः पंच मृत्तिकाः । दक्षः । आ
हरेन्मृत्तिकां विप्रः कूलात्ससिकतां तु याः । ऊर्ध्वदेशे तु संवीक्ष्य शर्करादिविवर्जितां । गौ
तमः । जलांतरेऽन्यशौचे च उद्धरेच्च तथैव च । सिकतावृक्षमूले च न ग्राह्याः पंच मृत्तिकाः ।
विप्रैर्भुज्यानान्ये तिकेचित् । उद्धृतमृत्तिकाभावे यस्मिन्देशे या मृत्तिकास्ते च ग्राह्याः । तत्र
प्रमाणं मनुः । आर्द्रप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता । द्वितीया च तृतीया च तदर्धार्ध
प्रकीर्तिता । अहत्वा द्विशोधनेन तु आर्द्रामलकमात्रा ग्राह्या । एका लिंगे करे तिस्रः उभ
योर्मृद्द्वयं स्मृतं । पंचापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः । अत्र चंद्रिकायां विशे
षउक्तः । सव्ये हस्ते दश मृत्तिका अनंतरं तस्मिन्नेव हस्ते देशे षण्मृत्तिकाः नखेषु षण्मृत्तिकाः स्पृ
तात्तु उभयोः करयोः सप्त मृत्तिका ज्ञातव्याः । यदोक्तसंख्यायाः अर्वाक् गंधलेपक्षयो
न वति तदा अदृष्टार्थत्वात् उक्तसंख्या पूर्णा कार्या । यदोक्तसंख्यया तु गंधलेपक्षयो न

बहिरंतस्थ आचांतः सर्वत्र शुचिरेव तु। शब्देनापः पयः पीत्वा शब्देन घृतपायसं। शब्दे
नापोशानं पीत्वा सुरापानसमं भवेत्। तावन्नापः पिबेद्विप्रो यावद्वामेन न स्पृशेत्। वामे
वह्न्यादस्त्रादित्या रुद्रा एकादशास्मृताः॥ इति पुराणाचमनं। अथ पक्षमुख्यं। याज्ञवल्क्यः।
त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्। अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेन
बुद्बुदैः। हस्तौ पादौ प्रक्षाल्य गोकर्णाकृतिहस्तेन फेनबुद्बुदरसगंधवर्जितमाषमग्नं जलमा
दाय अंगुष्ठकनिष्ठिके मुक्त्वा ब्रह्मतीर्थेन त्रिश्चतुर्वा पीत्वा हस्तौ प्रक्षाल्य संहतांगुष्ठमूलेन
ओष्ठौ मुखं सकृदुन्मृज्य अंगुष्ठतर्जनीभ्यां घ्राणं अनामिकांगुष्ठाभ्यां चक्षुषी श्रो
त्रे च अंगुष्ठकनिष्ठिभ्यां नाभिं हृदयं तलेन सर्वांगुलीभिः शिरः बाहुमूले सर्वांगुल्यग्रैः
तुशब्दाद्दर्शाधारगतानां स्नानाचारवर्जितानां निषेधः। पुनरंबुग्रहणं प्रतिच्छिद्रमुदकस्पर्शना
र्थं स्कांदे। अंगुष्ठमूलदेशेन द्विर्द्विरोष्ठावुपस्पृशेत्। अंगुलीभिस्त्रिभिः पश्चात्पुनरा
स्यं स्पृशेत्सुधीः॥ अथाचमननिषेधः। शूद्रानीतैः करनीर्वाचामेन्नैकपाण्यात्तेन च। त ॥४॥
पैः पाश्वहस्तेन नापरिज्ञातहस्ततः। अव्रतोऽनुपनीतः दानमाचमने होमे भोजनं देवता

र्चनं। प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणं। आसनारूढपादस्तु जानुनोर्वाथ जंघयोः। कृ
तावसक्थिको यस्तु प्रौढपादः स उच्यते। अपवित्रकरो नग्नः शिखां मुक्त्वा शिखोपि वा। विनायज्ञ
ज्ञोपवीतेन नाचांतः शुचितामियात्। मरीचिः। शिरः प्रावृत्य कंठं वा मुक्तकच्छशिखोपि वा।
अकृत्वा पादयोः शौचमाचांतोप्यशुचिर्भवेत्। कांस्येनायसपात्रेण त्रपुसीसकपित्तलैः।
आचांतः शतकृत्वोपि न कदाचन शुध्यति। जान्वोरूर्ध्वं जलेतिष्ठन्नाचांतः शुचितामियात्
अधस्ताच्छतकृत्वोपि समाचांतो न शुध्यति। स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे।
आचांतः पुनराचामेद्वासो विपरिधाय च। आपस्तंबः। सोपानत्को जलस्थो वा मुक्तकेशो
शिखोपि वा। सोष्णीषो वस्त्रपर्यंकः प्रौढपादश्च यो नरः। दुर्देशोपपदश्चैव नाचामन्शुद्धि
मानुयात्। संध्यार्थे भोजनार्थे च पित्र्यर्थे वा तथैव च। नाचामेच्छूद्रहस्ताज्जपादिष्वहवने
षु च। पादप्रक्षालनशेषेण नाचामेद्ब्राह्मणः क्वचित्। अशक्तौ भावे पिप्पल्याः किंचित्क्षिप्त्वा भूमा
वुपस्पृशेत्। शौचशेषेण संध्याशेषेण च नाचामेत्। अन्नाभावे भूमावुदकं कंकरिति
क्षिप्त्वाचामेत्॥ अथाचमननिमित्तानि। उच्छिष्टस्पर्शे पादनेजने शिखामोक्षे यज्ञोप

वीतागमे जलमुत्तीर्य संदेहेषु सर्वेषा चामेत्। आस्यागतश्मश्रुस्पर्शे अलोमकोष्ठस्पर्शे
दंतरलजिह्वास्पर्शे नखास्थिस्पर्शे उच्छिष्टोपहतस्त्रीशूद्रभाषणे अस्पृश्यस्पर्शे पिच्यमे
त्रप्रवचने आलालंभे क्रोधे मार्जारमक्षिकास्पर्शे प्रहासे ष्ठीवने ऽनृतभाषणे धित्यादिनि
मित्ते वा चामेत्। तांबूले क्रमुके होमे भुक्तस्नेहानुलेपने इक्षुदंडे तिले मूले पत्रपुष्पफलेषु
च। तथा तृणकाष्ठेषु नाचामेदमतद्भक्षणे। मधुपर्के च सोमे च अप्सु प्राणाहुतिषु च।
आस्यहोमेषु सर्वेषु नोच्छिष्टो भवति द्विजः। माधवीये। तांबूलेक्षुफले चैव भुक्तस्नेहानु
लेपने। मधुपर्के च सोमे च नोच्छिष्टं धर्मतो विदुः। वामहस्ते स्थिते दर्भे दक्षहस्तेन नाचमेत्। अ
स्मिन्विषये तरवद्भे विधौ विशेष उच्यते। ज्योतिर्विहितं पात्रं धर्मलिंगं च कंचुकं। पादुको
पानहः खड्गं स्पृष्ट्वाचम्य विशुद्ध्यति। जपहोमप्रदाने तु पित्रपिंडोदकादिषु। कृतेषा
चमने कार्यं त्रिक्रियेषु सर्वदा। अधोवायुसमुत्सर्गे आक्रंदे क्रोधसंभवे क्षुते। मार्जारमूषक
स्पर्शे प्रहासे ष्ठीवने ऽनृते। अंत्यसंभाषणे दर्शने च कर्म कुर्वन्नाचामेत्। श्वकाकादिस्प ॥५॥
र्शने चैवं। स्कांदे। अनुष्णाभिरफेनाभिर्हृद्गाभिरत्वरः। ब्राह्मणो ब्रह्मतीर्थेन दृष्टिपूता

भिराचमेत्। कंठगाभिर्नृपः शुद्ध्येत्तालुगाभिस्तथोरुजः। स्त्रीशूद्रौ चास्यसंस्पर्शमात्रेणापि विशु
द्ध्यति। स्नात्वा भुक्त्वा पयः पीत्वा प्रारंभे शुभकर्मणां। सुप्त्वा वासः परीधाय तथा दृष्ट्वाप्यमंगलं।
प्रमादादशुचिं स्पृष्ट्वा द्विराचांतः शुचिर्भवेत्। क्रियाः सर्वाः कुरुते मोहादनाचम्यैव नास्तिकः। भ
वंति हि वृथा तस्य क्रियाः सर्वा न संशयः। इत्याचमनविधिः। अथामिषलक्षणं प्रसंगादुच्यते।
मसूरमामिषं धान्ये फले जंबीरमामिषं। गोवर्ज्यमामिषं क्षीरं चर्मपशुपक्वमामिषं। प्राण्यंगमामि
षं चूर्णं नारनालकमाषिकं। साक्षादग्निहिरण्यं च आमिषं चाप्यथा स्मृतं। आमलकादिसंयु
क्तकांजिकायां न निषेधः। सफलाकांजिका यस्य गृहे तिष्ठति नित्यशः। तस्याप्सु कांजिकं या
स्यं नेतव्या (?) कथंचन॥ अथ दंतधावनविधिः॥ रुद्रयोगी। प्रातर्भुक्त्वा च शुध्यर्थं कर्तव्यं
दंतधावनं नित्यं (?)। तत्र मंत्रः। आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्म प्रज्ञां च मेधां च त्वं
नो धेहि वनस्पते। कात्यायनः। उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः। परिजप्य च मंत्रे
ण भक्षयेद्दंतधावनं। परिजप्य प्रातः स्मरामीत्यादि जपित्वा। प्राङ्मुख उदङ्मुखो वा ऽन्य
भिमुखो वा वर्जो नुपरे वाग्यत आचम्य कटुकषायतिक्तसुगंधि कंटकिक्षीरि लतादि

नामेकं प्रक्षाल्यितं दंतकाष्ठं त्विति स्तिमा द्वादशांगुलं वा कनिष्ठाग्रसमस्थूलं । स्कंदपुराणे मुखे
पर्युषिते यस्माद्भवेदशुचिमान्नरः । ततः कुर्यात्प्रयत्नेन शुद्ध्यर्थं दंतधावनं । उपवासेपि नो दुष्येद्दं
तधावनमंजनं । एकैकांगुलिह्रासेन वर्णोष्वन्येषु प्रदितं । उपवासे तृणपर्णादिनेत्यर्थः । तथा च स्मर्य
ते । उपवासे एकादश्यां तृणैः पर्णैर्वा कर्तव्यं दंतधावनं । स्नानादेवार्चनं कृत्वा व्रतसंकल्पमाचरेत् । य
त्तूपवासे दंतधावननिषेधवचनं शरज्ञोक्तः सकाष्ठविषयो न तृणपर्णादिनेति गम्यते । प्रतिपद्दर्शषष्ठीषु
नवम्येकादशी रवौ । दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलं । षष्ठी इति पदात् अष्टमीपर्वसु विचो
षतो नवम्यां च अमंगं ... यमास्वं दंतकाष्ठं च वर्जयेत् । तथा च स्मर्यते । षष्ठीषु तैलं पलं मष्टमी
षु क्षौरं क्रियां चैव चतुर्दशीषु । स्त्रीसेवनं नष्टकलासु पुंसामायुःक्षयार्थं मुनयो वदंति । स्मृ
त्यंतरे । उदिते च सहस्रांशौ यः कुर्याद्दंतधावनं । सविता भक्षितस्तेन पितृवंशस्य घातक
कः । दंतधावनजिह्वोल्लेखनिकां षष्ठ्यादिषु वर्जयेत् । कीटादिनदूषितं दंतकाष्ठं न ग्राह्यं । स्त्री
णां चतुरंगुलं स्यात् । श्लेष्मातक्यरिष्टजंबुकिंशुकप्लक्षबिल्वनीलतक गुग्गुलककर्कधुसुक्ति ॥६॥
दुकबंधूककोविदारकुशपारिभद्राम्लिकाश्चवर्ज्याः । इति कालोपपापाणि न कुर्याद्दंतधा
वनं । पालाशं कुसुमं काशं कुशं चैव तु शिंशिपं । कार्पासं दमयंतीं च शाल्मलीं शिरीषं शने । ल

क्ष्मणो वरं जंवटार्कबकुलपारिजातक निर्गुंडीसूचीमुखकंटकी ... खाश्वपूतीगंधोग्रगंध
विषदग्धमूर्ध्वशुष्कान्वर्जयेद्विवेके । अष्टम्यां चतुर्दश्यां पौर्णमास्यां स्त्री तैलदंतकाष्ठानि व
र्ज्यानि । अर्कवारे व्यतीपाते संक्रांत्यां जन्मवासरे । वर्जयेद्दंतकाष्ठानि नंदास्वपि च पर्वसु । म
ध्यमानामिकांगुष्ठैर्दंतान् धावयेत् । आसने शयने याने पादुके दंतधावने । पलाशाश्वत्थयो
र्ह्लौ सर्वेकर्मसु [illegible]तौ । वंधूकमल्लिकारज्जुकार्पासाः श्री[illegible]रामताः । तथा उदुंबरवटकु
मुकशिंशिपा × कुलिं × श्वत्थ । शीघ्रुभिः कुशकाशौ दंतधा × ह × वने गांपश्येन्नान्यपाशु
द्धिः । शरेण याव नालेन यः कुर्याद्दंतधावनं । तावद्भवति चंडालो यावद्गंगां न पश्यति । इति
कालोपपापाणि नखैरंगुलिभिस्तथा । मुख्ये चानामिकांगुष्ठे न कुर्याद्दंतधावनं । कोवि
दारशमीप्लक्षश्लेष्मातकविभीतकाः । निर्गुंडीशिंशिपाशोककदंबककुरंटकाः । विहितप्रति
षिद्धाः स्युरिमे तस्मादिक्कल्पिताः । चंपकं राजवृक्षं च वर्जयेत् । अपामार्गेर्ध्यातिमे धौषुमा
शौरिवेपुर्व्छेतिः । आयुर्विघायशो लक्ष्मीः सौभाग्यं चोपजायते । विश्वादर्शे । दंतोल्ल
खो वितस्त्या भवति परिमिता वसुभिर्व्याघ्रमंत्रा । प्रातःक्षीर्यादिकाष्ठं खदिरपलाशोर्नि

मार्कबिल्वैः । मुस्ताआंगूषखदिरषड्कात्खदिरपिकुन्नाम्लते देशिनीमंगुलीभिर्नं दामृतापर्व
ण्यपिनरवलुनवम्यकेसंक्रांतिपाते । श्राद्धे यज्ञे च विषमे पत्योश्च प्रोषिते तथा । अजीर्णे चैव
वाहे च उपवासव्रतेषु च । दंतधावनमेतेषु वर्ज्यं स्यात्सर्वदा बुधैः । जन्मदिने च । अलाभे दंत
काष्ठानां निषिद्धे दिवसे तथा । अपां द्वादशगंडूषैर्विदध्याद्दंतधावनं । तृणपर्णादिना चैव अंगु
ल्या दंतधावनं । कुर्यात्प्रदेशिनीं वर्ज्य प्राङ्मुखः स्वोदङ्मुखो पि वा । अंगारवालुकापर्णैस्तृण
वस्त्रनखादिभिः । स्त्रीकामो हर्षितोप्यग्निना कुर्याद्दंतधावनं ॥ इति दंतधावनविधिः ॥ अथ
स्नानविधिः । वसिष्ठः । उषःकाले तु संप्राप्ते शौचं कुर्याद्यतेंद्रियः । ततः स्नानं प्रकुर्वीत दंतधावन
पूर्वकं । चतस्रो घटिकाः प्रातररुणोदय उच्यते । यतीनां स्नानकालोयं गंगांभःसदृशो भवेत् ।
ग्रामाद्बहिर्दिशायां दिशि गत्वा स्नायात् । सप्तजन्मकृतं प्रातःस्नायी द्विजः शूद्रश्च मानुयात् । स्मृति
सारसमुच्चये । उषस्युषसि यः स्नानं संध्यायामुदितेपि वा । प्राजापत्येन तत्तुल्यं महापातकना ॥७॥
शनं । अस्नात्वा नाचरेत्कर्म जपहोमादि किंचन । स्नात्वाधिकारी भवति दैवे पित्र्ये च कर्मणि ।
विष्णुः । वसा शुक्रमसृङ्मज्जा मूत्रविट्कर्णविण्नखाः । श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः ।

न्तर्पणं । तस्मात्स्नानं प्रकर्तव्यं रविवारे सदैव हि । उत्तमं तु नदीस्नानं तडागे मध्यमं स्मृतं । कूपे स्नानं तु सा
मान्यं भांडे स्नानं वृथा वृथा । स्नानं रजस्वलातीर्थेषु न कुर्यात्सर्वथा द्विजः । दशहस्तं परित्यज्य गात्रस्नानमेव वि
धीयते । स्नानं रजस्वलातीर्थेषु भोजनं गणिकागृहे । ये कुर्वंति द्विजा मोहात्ते ज्ञेया नियमभंजकाः । भस्मना
शुद्ध्यते कांस्यं ताम्रमम्लेन शुद्ध्यति । रजसा शुद्ध्यते नारी नदी वेगेन शुद्ध्यति । अत्रिः । बाह्यदशनि
कर्मसु पादहीनो द्विजः । प्रयाति नरकं घोरं यावदिंद्राश्चतुर्दश । मनुः । प्रक्षाल्य हस्तौ पादौ च मुचि
राचम्य वाग्यतः । तिथिवारादिकं ज्ञात्वा तु संकल्प्य यथाविधि । वृद्धपराशरः । कृत्वा पशौचं च प्र
क्षाल्य पादौ हस्तौ च मृज्जलैः । निबद्धशिखकच्छः द्विज आचमनं चरेत् । यमः । कराभ्यां धारये
द्दर्भान्शिरवा बद्ध्वा विधाय च । प्राणायामांस्ततः कुर्यात्कालज्ञानं यथाविधि । मनुः । स्नानोपकर
णं सर्वं स्थाप्य दक्षिणतो नरः । कुर्वन्यः कुरुते स्नानं श्रेयो न तदवाप्नुयात् । तिथ्यादि संकीर्त्य आत्म
नः समस्तपापक्षयार्थं दुष्टबुद्धिप्रभवविषमश्राद्धजन्यपापापनुत्त्यर्थं देवर्षिपितृतृप्त्यर्थं स्नानं क
रिष्य इति संकल्प्य । स्रोतसोभिमुखो मज्जेद्यत्रापः प्रवहंति च । स्थावरेषु च सर्वेषु आदित्याभिमु
खस्तथा । वसिष्ठः । स्रोतसोभिमुखः स्नायान्मार्जनं चाघमर्षणं । अन्यत्रार्कमुखो वा प्रांङ्मुखोऽथ

मुखो पिबा। यायाः समुद्रगानद्यस्तासु स्नानं च सम्मुखं। सर्वेषां शाखिनामुक्तं मुनिना वाजसनेयिनः॥
प्रवाहाभिमुखं स्नानं मन्त्रामार्थं वेदिनां। आदित्याभिमुखं स्नानं यच्चु पांशुसदे चहि। इति शाखाभे
देनोक्तमित्यन्वयः। नद्यां नास्ति मते स्नाया द्विजो षा मध्ययामयोः। अग्निं प्रज्वाल्य वा स्नाया न्न
द्यादिषु महाजले। नाभिमात्रे जले स्थित्वा केशान्सृत्वा द्विध्या द्विजः। निरुद्ध कर्ण नास स्तत्रिवारं
मज्जनं चरेत्। विश्वामित्रः। नाभिमात्रे जले तिष्ठन्मस्ताद्धृ द्रशपंचेच। त्रिवारं चा पिचा तुल्य स्नान
मेवं विधीयते। स्नात्वा पदे द्वे प्रक्षाल्य पुनः स्नात्वा द्विराचमेत्। आपोहिष्ठादिनव भिर्वारु
णीभि र्जयेदथ। कृष्णादिके संध्यायां मवक्ष्यते। तत्वायामी ति मंत्रस्य शुनःशेपो वरु
णस्त्रिष्टुप्। मार्जने विनियोगः। तत्वायामि०॥ पिङ्गग म्र। इममित्तिमंत्रस्य शुनःशेप ऋषिः
इंद्रो देवता गायत्री छंदः। मार्जने विनियोगः॥ पिङ्गग०। प्रतिमंत्रं प्रकुर्वीत मंत्रैर्मार्जनकं द्विजः।
संध्यायां स्नानकाले वा मर्षावादे थवा कृते। इमं मइति मंत्रेणा उदकालोडनं मतं। सांगुष्ठय ॥८॥
ज्ञसत्रेण त्रिः प्रदक्षिणमाचरेत्। इमं मइति मंत्रस्य सिंधुक्षित्प्रैयमेध ऋषिः सर्वा नद्यो देवता
जगती छंदः। उदकालोडने विनियोगः। इमंमे०॥ आचम्य च ततः कुर्यादृतं चेत्यघमर्षणं। स्कांदे।

द्रुपदां कृत्वा ततो जप्त्वा जलमादाय पाणिना। कुर्यादृतं च मंत्रेण विधिज्ञस्त्वघमर्षणं। निमज्यास्मुच्यो
विद्वान्जपेत्त्रिरघमर्षणं। यथाश्वमेधावभृथस्तस्य स्यात्तु तथा ध्रुवं। जले वापि स्थले वापि यः कु
र्यादघमर्षणं। तस्याघौघो विनश्यति यथा सूर्योदये तमः। इममृच्यं चेत तत्थ्यो स्ना कुर्यादाचमनं द्विजः।
आचार्याः केचिदिच्छंति शाखाभेदेन चापरे। निमग्नोप्यघमर्षणं कुर्यादिति सम्यत् धर्मसारेउक्तं
ततः कृत्यं। अंगुष्ठांगुलिभिः श्रोत्रं मुखं पश्चाच्च नासिकां। त्रिवारं मज्जनं कृत्वा देहं प्रक्षाल्य चा
चमेत्। ततः प्राणायामपूर्वं यथाशक्त्या सावित्रीं जपेत्। तद्विष्णोरिति मंत्रस्य मेधातिथिर्विष्णु
र्गायत्री। सकलपापक्षयार्थे जपे विनियोगः। तद्विष्णो:०। संग्रहे। प्रतिग्रहापतियाद्यं कृत्वा
चानक्ष्य नक्षणं। तद्विष्णोरित्यपां मध्ये सकृज्जप्त्वा विशुद्ध्यति। अथ स्नानांगतर्पणं। ब्रह्माद
योये देवास्तान्देवांस्तर्पयामि देवपत्नीस्तर्पयामि देवगणांस्तर्पयामि। भूर्देवांस्तर्पयामि भुवर्देवां
स्तर्पयामि स्वर्देवांस्तर्पयामि भूर्भुवःस्वर्देवांस्तर्पयामि। अथ नीवीती। तत्राङ्गिराः। ऋषितर्पणं चंडा
के भाषणे शव वाहने। विण्मूत्रोत्सर्जने पुरुषाः इति संग्रहे निवीयते। नीवीतं कंठलंबितनित्यमरः

अथ प्रकृतं। कृष्णद्वैपायनादयो ये च ऋषयस्तान् ऋषीन्स्त० ऋषिपत्नीस्त० ऋषिगणांस्त० भूर्ऋ०
भुवर्ऋ० स्वर्ऋ० भूर्भुवःस्वर्ऋ० अथ सनकादयो ये मनुष्यास्तान्मनुष्यांस्त० भूर्म० भुवर्म० स्वर्म० भू
र्भुवःस्वर्म०। अथ प्राचीनावीती पितॄंस्तर्पयेत्। सोमः पितृमान्यमो अंगिरस्वानग्निष्वात्ताग्निकव्य
वाहनादयो ये पितरस्तान्पितॄंस्त० भूः पि० भुवः पि० स्वः पितॄं० भूर्भुवःस्वः पितॄंस्तर्पयामि। उत्त
र्यं पीडयेद्वस्त्रमपसव्यं यथाविधि। तत्र मंत्रः। असंस्कृतास्च ये केचिज्जलाशाः पितरो गताः। तेषा
माप्यायनायैतद्दीयते सलिलं मया। बृहद्वसिष्ठः। वहंती पुण्यहस्तस्य निमज्य स्नानमाचरेत्। अ
न्यत्रासिच्य वा हस्ताभ्यामितरे पांसुसर्वदा। धर्मप्रदीपे। प्रेतस्पर्शे प्रवहनं स्नानं केशविधानतः।
नजीवत्पितृकः कुर्यात् गजौन्यारोप्य धारणं। स्कांदे। अस्नात्वा चाप्यहुत्वा वा अदत्वा भ्वातियो
गृही। देवादीनामृणी भूत्वा नरकं प्रतिपद्यते। जलमध्ये यदा संध्यां जपंतत्र समापयेत्। आर्द्र
वस्त्रं निषेध्यं स्थल एव विदुर्बुधाः। ततश्चाचमनं कृत्वा प्रोक्षितं वस्त्रमावसेत्। वस्त्रं परिदध्या १५॥
दंगं न मार्जयेत्। योगी। तस्मात्काये नोमृजीत अंबरेण करेण वा। श्वानलेह्येन साम्यं च पुनः

पिर्वंतिः

स्नानेन शुध्यति। तिस्रः कोट्योर्धकोटी च यावद्रोमाणि मानुषे। वसंति सर्वतीर्थानि तस्मान्न परि
मार्जयेत्। पिबंति शिरसो देवाः पिबंति पितरो मुखात्। मध्याच्च यक्षगंधर्वा अधस्तात्सर्वजंतवः। पुरा
णान्तरे तोयं स्पृष्टतः केशबिंदवः। दक्षिणे जानुकर्पे वी तोयं वामे तु पितॄन्नयेत्। वसिष्ठः। स्नानं
कृत्वा पटांतेन वस्त्रप्रांतेन केशबिंदवः। तत्स्नानं निःफलं विद्यात्पुनः स्नानेन शुध्यति। स्मृत्यर्थसारे।
केश॰ स्नात्वा नपीडयेत् [redacted] भोगे न्यस्तोय मुद्धरेत्। नवस्त्रं धुनुयात् हस्ताभ्यां न केशान्न च धूनयेत्। स्ना
तो नांगे विमृज्याच्च स्नानवस्त्रेण सर्वथेति। स्मृत्यंतरे। शुष्कशीर्षं च कर्तव्यं नथा शुष्केन पा
वाससा। तथा बद्धशिखश्चैव राक्षसस्त्वन्यथा भवेत्। केशान्मार्जयेत्स्नानगमिति तावः।
शुष्कशीर्षं च कर्तव्यमित्युक्तत्वात्। एककाले स्नानद्वयस्य प्रयोगो न कर्तव्यः। तथा च स्मृतिः
स्नानद्वयं नैक॰ नैककाले द्वयं स्नानं न कालेतर्पणद्वयं। नैककाले द्वयं श्राद्धं न स्त्रियै भोजनद्वयं। कर्मविपाके
णा हस्तेनाध्यः शौचे नियोजयेत्। तथैव वामहस्तेन तेरुर्ध्वेन योजयेत्। मनुः। स्नानं मानसमं
प्रसादजननं दुःस्वप्नविध्वंसनं शौचस्यायतनं मलापनयनं संवर्धनं तेजसः। रूपोद्यो
तकरं रिपुप्रशमनं कामस्य चाप्यायनं नारीणां च मनोहरं श्रमहरं स्नाने दशैते गुणाः॥ सूर्य

वातोन स्नान्नं ब्रह्मस्नानं वरुणं घटोदकं। मार्जनं रेणुकं शांबु हि विपुण्यं पुराकृतं॥ इति स्नानविधिः॥
अथ वस्त्रविधिः। श्रुतिस्मृतिपुराणेन यथार्हं वस्त्रं च धारयेत्। षट्कर्मनिरतो ग्राह्यं वस्त्रं तु
न धारयेत्। वसिष्ठः। अपवित्रपटो नग्नो नग्नश्चार्धपटः स्मृतः। नग्नश्च मलिनोद्वासी नग्नः
कौपीनवानपि। काषायवाससा नग्नो नग्नश्चानुत्तरीयकः। अंतःकच्छो बहिःकच्छो मुक्त
कच्छस्तथैव च। साक्षान्नग्नः स विज्ञेयो दशनग्नाः प्रकीर्तिताः। उत्तरीयवस्त्रं नवांगादभे
वेन्न्यूनं धनुर्मुल्लं त्र्यंगुलं वा पटं वा निर्मितं ग्राह्यं। वसिष्ठः। काषायं कृष्णवस्त्रं च मलिनं केशदू
षितं। छिन्नाग्रं चोपवीतं च कुत्सितं धर्मतो विदुः। हारीतः। नग्नः काषायधासाः स्यान्नग्नः
कौपीनकेवलः। नग्नः संधितवस्त्रश्च नग्नो विद्रावस्त्रकः। याज्ञवल्क्यः। दग्धं जीर्णं च
मलिनं मूषकोपहतं तथा। खादितं गोमहिष्याद्यैस्त्याज्यं सर्वं धा द्विजैः। नीलरक्तं तु य
द्वस्त्रं दूरतः परिवर्जयेत्। स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति। पालनाद्विक्रयाच्चैव
तद्वृत्तेरुपजीवनात्। अपवित्रो भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति। स्मृत्यंतरे। नीलीरक्तं य
दा वस्त्रं विप्रः स्वांगेषु धारयेत्। तंतुसंततिसंख्याकं वसेद्यमपुरे ध्रुवं। कंवलेपट्टसूत्रे च नीली ॥१०॥

श्रीगणेशाय नमः। श्रीरामपुत्रश्यामाघातिगाविंद

दोषो न विद्यते। स्त्रियावस्त्रं सदा त्याज्यमन्यवस्त्रं च वर्जयेत्। अधौतं कारुधौतं च पूर्वेद्युर्धौ
तमेव च। त्रयमेतदसंबद्धं सर्वकर्मसु गर्हितं। ईषद्धौतं स्त्रिया धौतं शूद्रधौतं तथैव च। अ
धौतं तद्विजानीयात् पंकदक्षिणपल्लवैः। असुनोपीड्येद्वस्त्रं सर्वदा द्विजसत्तमः। स्वच्छायाः
शुष्कं तु परिधानं वस्त्रं च न धारयेत्। धौतं चतुर्गुणीकृत्य भूमौ वस्त्रं न पीडयेत्। वामकोष्ठे च
निक्षिप्य बहिराचम्य विशुध्यति। प्रागग्रमुदगग्रं वा धौतं वस्त्रं प्रसारयेत्। प्रत्यग्दक्षिणयोः
कृत्वा पुनः शौचं विधीयते। एकवस्त्रो न भुंजीयान्न कुर्याद्देवतार्चनं। न कुर्यात्पितृकर्माणि
दानं होमं जपं तथा। खंडवस्त्रावृतश्चैव खंडाच्छं प्रावृतोऽपि वा। वचनं तस्य नयायं भु
नोद्धेयं हविर्यथा। चंद्रिकायां। स्नानं दानं जपो होमः स्वाध्यायः पितृकर्म च। नैकवस्त्रो
द्विजः कुर्याद्भोजनं च तथा क्रियाः। सव्यादंसात्परिभ्रष्टं कटिनाधारितं च यत्। एकव
स्त्रं तु जानीयात्। वसिष्ठः। अष्टहस्तं नवं धौतं सदशं नान्यधारितं। अहतं तद्विजानीयात्
सर्वकर्मसु पावनं। योगीयाज्ञवल्क्यः। जानुमूलं तु वस्त्रं स्यात् त्रिकच्छं धारयेद्द्विजः। तन्न्यू

नमाचेत् कृत्वा कर्मभ्रष्टो भवेद्द्विजः ।। मनुः ।। नाभौ च वामकुक्षौ च पृष्ठे चैव यथाक्रमं वस्त्र
प्रसारणं यस्या त्रिकच्छं कमुदाहृतं । ऊर्ध्वकच्छो द्विकच्छो वा तिर्यक्कच्छो द्विकच्छुकः । अकच्छः
पुच्छकच्छश्चैव सर्वधर्मबहिष्कृतः ।। अथार्द्रवस्त्रनिष्पीडनविधिः ।। स्नानं कृत्वार्द्रवस्त्रं तु त्यजे
न ग्राम धोरणः द्विजः । गृहे तु स्नानं कृत्वा विसृजेद्दत्त ऊर्ध्वतः । वसिष्ठः । स्नानं कृत्वार्द्र
वस्त्रमुत्तरीयकमूर्ध्वतः । धौतवस्त्रमधः कृत्वा आचम्य च पुनर्द्वयं । नोत्तरीयमधः कुर्यान्नोप
र्यधःस्थमंबरं । अज्ञानाद्यदि कुर्वीत पुनः स्नानेन शुध्यति । वसिष्ठः । स्नानांगतर्पणं कृत्वा स्ना
नवस्त्रं निपीडयेत् । नित्यं वा तर्पणं कुर्याद् एष धर्मः सनातनः । निःपीड्य वस्त्रमाचम्य ततः सं
ध्यां समारभेत् । मध्याह्ने तर्पणादूर्ध्वं वस्त्रनिष्पीडनं भवेत् । येबौधवायेति । पीडयित्वा
द्रवस्त्रं तु पश्चात्संध्यां समाचरेत् । अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत् । एतत्
प्रातःस्नानविषयं मध्याह्ने तु विशेषः स्नानार्थमभिगच्छंतं देवाः पितृगणैः सह । वायुभूतास्तु ।।१२।।
गच्छंति तृषार्ताः सलिलार्थिनः । निराशाः पितरो यांति वस्त्रनिष्पीडने कृते । अतो मध्याह्ने तर्पणा

दूर्ध्वमिति । आत्मानं पुत्रदारांश्च भृत्यवर्गास्तथैव च । यः पीडयति लोभेन स कदर्य इति स्मृतः
तथादि स्नानयोगे हि स्नानवस्त्रं सदा द्विजः । स्वयमेव च निःपीड्य क्रियाहस्तेन दोषभाक् ।।
द्वादश्यां पौष्यं च दर्शे च संक्रांतौ स्नानवासरे । वस्त्रं निःपीडयेन्नैव न च क्षा[illegible] योजयेत् ।। त्वेन
क्षालनार्थं रजकगृहे न देयं । स्कंदपुराणे । स्नात्वैकं वस्त्रमापीड्य गृह्णीयाद्धौतवाससी ।
आचम्य च ततः कुर्यात् प्रातःसंध्यां कुशान्वितः । अतः प्रातःस्नाने त्वपसव्येन
ईवस्त्रं निःपीड्य सव्येन चाचम्य धौतवाससी धृत्वा द्विराचम्य संध्याकर्म कुर्यात् ।। अ
पस्तु विशिष्य स्नानाल्पसर्णं । योगी याज्ञवल्क्यः । मांत्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव
च । वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात् । आपो हिष्ठादिभिर्मांत्रं मृद्दालेपेन पार्थि
वं । आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतं । यत्तु सातपवर्षेण स्नानं तद्दिव्यमु
च्यते । वारुणं चावगाहस्तु मानसं विष्णुचिंतनं । स्वच्छेन वारुणं कार्यं अन्यान्यशक्तेनेति ।
जाबालिः । प्रातः संक्षेपतः स्नानं मध्याह्ने तु सविस्तरं । भिक्षुरेकः प्रातःस्नाने तर्पणं न कार्यं ।।

अतएव स्मर्यते । प्रातःस्नाने न कर्त्तव्यं कदाचित्तिलतर्पणमिति । तर्पणे मध्याह्नो मुख्यः का-
लः ॥ ॥ इति स्नानविधिः ॥ अथ गृहस्नानं । गृहे गृहमुखं विद्यादन्यत्राभिमुखं रवेः । प्रवाहा-
१२ भिमुखं कुर्यात्स्नानमेवं द्विजोत्तमः । अशक्तश्चेत्सदा कुर्यात्स्नानमुष्णोदकेन तु । शक्तः शी-
तोदकस्नानं कुर्यान्न तु कदाचन । आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः । अ-
तः सन्तः प्रशंसन्ति स्नानमुष्णेन वारिणा । शीतोदकं च दन्मैश्च पश्चादुष्णोदकं क्षिपेत् ॥ आ-
सनरहितं स्नानं पाषाणे तु ध्वतः स्थितः । गृहे चैतान्विवर्ज्यानि सर्वदा हि द्विजसत्तमैः । अ-
द्भिर्हस्ते न यत्स्नानं संकल्परहितं तथा । तत्स्नानं निःफलं चैव आपस्तम्बो ब्रवीन्मुनिः ।
गृहस्नाने न कुर्वीत तिलतर्पणमार्जनं तथा । नोत्तराचमनं कुर्यात्पश्चादाचम्य शुध्यति । स्ना-
नं धौतकानं तर्पणे वस्त्रपीडनं । करपात्रगतं तोयं गृहे चैतान्विवर्जयेत् । गृहे स्नानं ॥१२॥
यदा कुर्यात्स्नानवस्त्रोर्ध्वकं त्यजेत् । अधो अग्रेण संपीड्य पश्चाद्धारव चोयथा । स्नानं
कृत्वार्द्रवस्त्रं तु ऊर्ध्वमुत्तारयेद् द्विजः । आर्द्रवस्त्रमधस्ताच्चेत्पुनः स्नानेन शुध्यति ॥ इति गृहस्नानं ।

एकोनविंशप्रणवैः पादादिशिरश्च ऋचा त्र्यृचा । आपो हि नवपादेषु मार्जने हि चतुष्टयी । अथ प्रयो-
गः । ॐ आपो हि ष्ठा मयो भुवः । चरणयोः । ॐ ता न ऊर्जे दधातन । शिरसि । ॐ महे रणाय चक्षसे
हृदये । ॐ यो वः शिवतमो रसः । शिरसि । ॐ तस्य भाजयतेह नः । हृदये । ॐ उशतीरिव मातरः ।
चरणयोः । ॐ तस्मा अरं गमाम वः । हृदये । ॐ यस्य क्षयाय जि० न्वथ । चरणयोः । ॐ आपो ज-
नयथा च नः । मूर्ध्नि । अर्द्धर्चशः । ॐ आपो हि० शिरसि । ॐ महे रणा० हृदये । ॐ यो वः०
चरणयोः । ॐ उशती० हृदये । ॐ तस्मा० चरणयोः । ॐ आपो ज० शिरसि । ऋक्शः । ॐ
आपो० हृदये । ॐ यो वः० पादयोः । ॐ तस्मा० शिरसि । त्र्यृचेन । ॐ आपो हि ष्ठा । शि-
रसि मार्जयेत् ॥ इति मंत्रस्नानं ॥ अथ भस्मस्नानं । सद्योजातेन गोशकृद्ग्राह्यं वामदेवेन पिण्डमभि-
मन्त्रणं । अघोरेण दहेत्पिंडं ग्राह्यं तत्पुरुषेण तु । ईशानमिति मंत्रेण शोधयेद्भस्म मंत्रवित् । मा
मानस्तोके इति मंत्रेणाभिमंत्रितं भस्म धारयेत् । ईशानेति शिरोदेशं मुखं तत्पुरुषेण तु । उ-
रोदेशमघोरेण गुह्यं वामेन सेचयेत् । सद्योजातेन पादौ सर्वांगं प्रणवेनाभिषेचयेत् । त्रि-
लोके भगवान्रुद्रो हृदयेह व्यवाहनः । नाभौ स्कंदे गले वा ऊर्ध्वमध्ये तु दक्षिणे रुद्रादि

त्यास्तथा मध्ये मणिबंधे त्रशिरसि तः। वामे च अन्ये वामदेवो मध्ये चैव प्रभंजनः। वसवो म
णिबंधे च दक्षे चैव हरः स्मृतः। शिरस्थात्मा महादेवः परमात्मा सदाशिवः। सर्वे च कंठ
पृष्ठे स्पालाः शक्तिमातृगणादयः। सर्वे देवाश्च रक्षंतु विभूतिमिति धारयेत्॥ इति
विभूतिस्थानी॥ अथ विभूतिप्रशंसा॥ वर्तुलेन भवेद्व्याधिरूर्ध्वरेखा धनक्षयः। ने
त्रयुग्मप्रमाणेन त्रिपुंड्रं धारयेद् बुधः॥ त्रिपुंड्रं तु द्विजः कुर्यादूर्ध्वपुंड्रं तथापि वा। त्रिपुंड्रं
सुरविप्राणां वर्तुलं नृपवैश्ययोः। अर्धचंद्रं तु शूद्राणामन्येषामूर्ध्वपुंड्रके। मध्यमा
नामिकांगुष्ठैर्ललाटे भस्मनाकृतं। रक्षार्थं मंगलार्थं च पवित्रार्थं च भामिनि। मया
हि गोपितं भस्म दुर्लभं हि महीतले। भस्म दृष्ट्वा तिरोदेवि मम मायाविमोहिताः। निंदंति
नास्तिका दांसा नराः पापेन कर्मणा। विपरीतानि पश्यंति म्रियंते च पुनः पुनः। पाखंडि
नो हि मनुजा ये हि पीतिमहेश्वरं। रेतोशिनो भवेयुस्ते वर्षकोटिशतत्रयं। पतंति नरके
घोरे षड्कल्पान् पुनः पुनः। भस्मो ह्यानि शिवमंत्रे मम स्थानि तानि भस्मानि कामदहू ॥१४॥
नाम विभूषणानि। त्रैपुंड्रकाणि चरितानि ललाटदेशे लुंपंति दैवलिखितानि दुरक्षराणि॥

वेदस्याध्ययने शूद्रो नाधिकारी यथा भवेत्। त्रिपुंड्रकं विना विप्रो नाधिकारी शिवार्चने।
॥ इति विभूतिमहिमा॥ अथ नैमित्तिकस्नानं। अजीर्णे भ्युदिते वांते श्मश्रुकर्मणि मैथुने।
दुःस्वप्ने दुर्जनस्पर्शे स्नानं चान्न विधीयते। मुहूर्तादुपरि स्नाते ऋतुकाल मैथुने उदयास्त
मयो रेतः स्कंदितो वास चैलं स्नात्वा पुनर्माम इति जपित्वा व्याहृतिभिर्जुहुयात्॥ पुनर्मामै
त्विंद्रियं पुनरायुः पुनर्भगः पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु मां स्वाहा। अनृतौ सचैलस्ना
नमेव। अस्थिस्पंदने कर्णौ कोष्ठे च सचैलं। रथ्याकर्दमतोयेन ष्ठीवनाद्येन वा पुनः॥
नाभेरूर्ध्वं नरो लिप्तः सद्यः स्नानेन शुध्यति। ग्रंथांतराद्विशेषोऽवगंतव्यः॥ अथाशि
रस्कस्नानं। अशिरस्कं तु यत्स्नानं स्नानाशक्तौ कर्मणां। आर्द्रेण वाससा वा परिमा
र्जनं दैहिकं विदुः। आर्द्रेण कर्पटेनाऽगशोधनं कापिलं स्मृतं। यत्र पुंसः सचेलं स्या
त्स्नानं तत्र सुवासिनी। कुर्वीत चाशिरः स्नानं शिरोरोगी जटी सदा॥ अथ शीतलो
दकस्नाननिषेधः। अबालौ शो भनगृहे त्वो भनाह च सर्वथा। न शीतलजलस्नानं

कार्यं चैवोत्सववासिना ।सुमंतुः। स्नानमध्ये मारोग्यं मांगल्यं स्वसख्यकारणं । नद्यादिषु न कु
र्यात कदाचिद्योत्सववासिना ॥ अथ यज्ञोपवीतविधिः। मनुः। यज्ञोपवीतं द्वे धार्ये श्रौते स्मा
र्ते च कर्मणि। तृतीयमुत्तरीयं स्याद्वस्त्राभावे तदुच्यते। रक्षादिना भिपर्येतं ब्रह्मसूत्रं प
वित्रकं। त्यक्तने रोगग्रस्तः स्याद् चिके धर्मनाशनं। आयुःकामः सदा धार्यं बहु यज्ञो
पवीतकं। पंच त्रि पुत्रकामी स्याद्धनकामी तथैव च। उपवीतं वटोरेकं द्वे तथेतरयोः
स्मृते। एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः। पुत्रवान् धनवान् भवतीति शे
षः। एकयज्ञोपवीतेन जपहोमादिकं कृतं। तत्सर्वं विलयं याति पित्र्ये नैवोपतिष्ठ
ति। पतितं त्रुटितं वापि ब्रह्मसूत्रं यदा भवेत्। नूतनं धारयेद्द्विप्र स्नानसंकल्प
पूर्वकं। आचम्य प्रतिसूत्रं तु त्रिगुणीकृत्य यत्नतः। यज्ञोपवीतमेकैकं प्रतिमंत्रे
ण धारयेत्। आचम्य प्रतिसंकल्पं धारयेन्मनुरब्रवीत्। एकमंत्रेकसंकल्पं धार्या यज्ञोप ॥१५॥
वीतकं। एकस्मिन्नुत्रुटिते सर्वं त्रुटितं नात्र संशयः। यज्ञोपवीतं स्याद्धिरण्यगर्भः परमात्मा

त्रिवृत्। श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थं यज्ञोपवीतधारणे विनियोगः। ॐ यज्ञोपवीतं० ॥
अनेन मंत्रेण दक्षिणबाहुमुरःसव्यकंठे धारयेत्। तैत्ता मैत्राः कठाः काण्वाश्च श्वेरका वाजस
नेयिनः। बह्वृचाः सामगाश्चैव ये चान्ये यजुःशाखिनः। कंठात्तु नीयेत् सूत्रं तु पुनः संस्कृतं हि
ति। अंगुष्ठं चोदधिस्नानेमातापि चो श्वापेत्। एतद्यज्ञोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते। सं
ग्रहे। कंठात्तु नीयेत् सूत्रं तु कुर्याद्द्विज्ञोत्तमो द्विजः। ऊर्ध्वं वृत्तं त्रिवृत्तं पुनरूर्ध्ववृत्तं तथा। एतद्य
ज्ञोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते। स्कंदः। उपवीतं क्रमेणस्यात्कार्पाससूत्रमाविकं। त्रिवृ
दूर्ध्ववृतं चैव भवेदायुर्विवृद्धये। विधवाभ्रष्टिकावंसमनध्याय कृतं च यत्। विछिन्नं चा
प्युपधोपातं भुक्त्वा निर्मितमुत्सृजेत्। मतांतरे। त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधोवृतं। त्रिवृ
द्यज्ञोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते। अन्नुत्तारसूत्रमादाय ब्राह्मणो मंत्रविद्वयी। दो ग्रंथि
विवृतं तेन ब्रह्मसूत्रं तदुच्यते। ब्राह्मणोत्पादितं सूत्रं विष्णुना त्रिगुणीकृतं। रुद्रेणादीयते
ग्रंथिः सा वित्र्या चाभिमंत्रितं ॥ इति यज्ञोपवीतविधिः॥ ॥ अथ पवित्रकविधिः॥ ॥दर्भाः ॥१६॥

मार्जनानंतरं प्रातरूर्ध्वपुंड्रं विनिर्दिशेत्। मध्याह्ने तिलकं त्वापोऽप्याद्यं समाचरेत्॥ यमः।
प्रातर्वै मार्जनं कृत्वा ललाटे तिलकः स्मृतः। ललाटे तिलकं कुर्यान्मध्याह्ने मार्जनं स्मृतं। उशनाः।
ऊर्ध्वपुंड्रं मृदा कुर्यात्तिर्यक्पुंड्रं च भस्मना। अर्घ्यदानात्परं प्रातरूर्ध्वं मध्याह्न एव तु। तत्रांगुलि
नियमः। अंगुष्ठः पुष्टिदः प्रोक्तो यशस्या मध्यमा भवेत्। अनामिका श्रियं दद्यान्मुक्तिं दद्यात्
प्रदेशिनी। दर्भपाणिर्न कुर्वीत भ्रूमध्यादि वर्द्धयेत्। श्रीकामः पुष्टिकामो वा आयुष्येष्टं तिल
कं चरेत्। नासामूलं समारभ्य वंशपत्रनिभं स्मृतं। वंशकामो द्विजः कुर्यात्तिलकं चंदनादिना।
जपो होमस्तथा दानं स्वाध्यायः पितृतर्पणं। व्यर्थं भवति तत्सर्वमूर्ध्वपुंड्रं विना कृते। पितृत
र्पणं स्वल्पतर्पणं। स्नात्वा पुंड्रं मृदा कुर्याद्धोमं कृत्वा तु भस्मना। अभ्यंगोत्सवकाले तु क
स्तूरीचंदनादिना। मध्यमानामिकांगुष्ठैरनुलोमविलोमतः। स त्रिपुंड्रो भवेत्तस्य सर्वकाम
फलप्रदः। ऊर्ध्वपुंड्रं त्रिपुंड्रं वा ब्राह्मणैः धर्मकर्तृभिः। वर्जयेत्तिलकं भाले श्राद्धकाले च ॥१६॥
सर्वथा। ऊर्ध्वपुंड्रं त्रिपुंड्रं वा चंद्रकारमथापि वा। श्राद्धकर्मणि न कुर्वीत यावत्पिंडान्न निर्वपेत्।

ऊर्ध्वपुंड्रं सदा कार्यं श्रौते स्मार्ते च कर्मणि। श्राद्धकाले तु संप्राप्ते वर्जनीयः प्रयत्नतः। स्मृत्यंतरे॥
न कदाचिन्मृदा तिर्यङ्न्यसेदूर्ध्वं तु भस्मना। उभयं चंदनेनैव तुल्यं न कदाचन। मृत्तिकाचंद
नं भस्मतोयं चतुर्थकं। एभिर्द्रव्यैर्यथाकालं तिलकं तु समाचरेत्। नदीवानां न श्राद्धेनाभ्यं
गेन च शस्यते। गोपीचंदनलेपः स्यादित्येवं मनुरब्रवीत्। विमुखाः सर्वदेवाश्च श्राद्धं तन्नि:
फलं भवेत्। अभ्यंगाद्धरते लक्ष्मीं भ्रष्टस्य नरकं ध्रुवं। त्रिपुंड्रधारिणं विप्रं यः श्राद्धे भोजयेद् द्वि
जः। पितरस्तस्य तृप्ताः स्युर्नीर्दत्तेषु दिवि दिवि। यस्यां पंक्तौ द्विजो भुंक्ते शिवभक्तस्त्रिपुंड्रकृत्
सतो। पंक्तिं पुनात्येष सकलां चतुराननं। ललाटे केशवं विद्यान्नारायणमथोदरे। माधवं हृ
दि विन्यस्य गोविंदं कंठकूपके। विष्णुं च दक्षिणे कुक्षौ बाहौ च मधुसूदनं। त्रिविक्रमं कर्णमूले
वामकुक्षौ तु वामनं। श्रीधरं च हृषीकेशं वामयोर्बाहुकर्णयोः। पद्मनाभं पृष्ठदेशे ककुद्दा
मोदरं स्मरेत्। वासुदेवं स्मरेन्मूर्ध्नि तिलकं कारयेदिति। शुक्लपक्षे एतानि नामानि कृष्णप
क्षे तु कराणि नामानि भवंति। [illegible] पर्वताग्रे नदीती
रे हरकायां विशेषतः। सिंधुतीरे च वल्मीके तुलसीमूलमृत्तिका। नप्रस्ताशिराः कुर्यात्तिलकं

धर्मसाधनं।नपादुकारूढोनादर्शेनजलेच्चवक्त्रोक्षयेत्॥ इतितिलकविधिः॥अथविभूतिधार
णविधिरुच्यते।सद्योजातादिमंत्रसिद्धंविरजोहोमसिद्धंअग्निहोत्रोद्भवंभस्महस्तेगृहीत्वाभ
स्माभिमंत्रणमंत्रस्यपिप्पलादऋषिः।गायत्रीछंदः।श्रीरुद्रोदेवता।श्रीरुद्रप्रीत्यर्थंजपेविनियो
गः।ॐमानस्तोकेतनये०॥अग्निरितिभस्म।वायुरितिभस्म।जलमितिभस्म।स्थलमितिभस्म।
व्योमेतिभस्म।सर्वंहवाइदंभस्म।एतानिचक्षूंषिभस्मानिभवंति।इतिमंत्रेणत्रिवारमभिमंत्र्य
मूलमंत्रेणाष्टोत्तरशतवारमभिमंत्र्य।त्र्यायुषंत्र्यंबकेत्यभिमंत्र्य।ईशानेतिशिरोदेशेमुखे
तत्पुरुषेणतु।उरोदेशेअघोरेणगुह्यंवामेनसेचयेत्।सद्येनैवतुसर्वांगेप्रणवेनाभिषेच
येत्।त्र्यंबकमंत्रेणजलेनसंयोज्यवैरूपाक्षायनमइति।ललाटेत्र्यंबकायनमः।हृदयेहव्यवा
हनायनमः।नाभौस्कंदायनमः।कंठेरुद्रायनमः।दक्षिणभुजेवामदेवायनमः।बाहुमध्येप
भंजनायनमः।मणिबंधेवसुभ्योनमः।×रुद्रेभ्योनमः।मध्येआदित्येभ्योनमः।मणिबंधेश
शिप्रभायनमः।वामभुजे×ग्रीवादेशेहरायनमः।पृष्ठेहरायनमः।ककुदिनीलकंठायनमः
मूर्ध्निसदाशिवायपरमात्मनेनमः।सर्वेषांगुणेषुदिक्पालाः।शक्तिमातृगणादयः।सर्वदेवा ॥१२॥

रक्षांकुर्विभूतिमितिधारयेत्॥ इतिभस्मधारणविधिः॥भस्मोद्धूलितसर्वांगमापादतलम
स्तकं।रोमाणिरोमाणिवसेल्लिंगंतद्देहंशिवमुच्यते।ॐसद्योजातंप्रपद्यामीत्यादिपंचब्रह्ममंत्राः।
श्रीमत्कालाग्निरुद्रोपनिषदःसंवर्तकोग्निर्ऋषिः।विश्वरूपीरुद्रोदेवता।अनुष्टुप्छंदः।श्रीरु
द्रप्रीत्यर्थंजपेविनियोगः।अथकालाग्निरुद्रंभगवंतंसनत्कुमारःपप्रच्छ।अधीहिभगवन्त्रिपुं
ड्रविधिंसतत्त्वंकिंद्रव्यंकिंस्थानंकतिप्रमाणंकारेखाःकेमंत्राःकाःशक्तयःकिंदैवतंकःकर्ता
किंफलमिति।तंहोवाचभगवान्।यद्द्रव्यंतदाग्नेयंभस्मसद्योजातादिपंचब्रह्ममंत्रैःपरिगृह्यअ
ग्निरितिभस्मेत्यनेनाभिमंत्र्यआपोहिष्ठेतिमर्दयित्वामानस्तोकेतिसमुद्धृत्यत्रान्नोद
धीतिविसृज्यत्र्यायुषमितिशिरोललाटवक्षःस्कंधेष्विति।त्रिभिस्त्र्यायुषैस्त्र्यंबकैस्तिर्यक्ति
स्रोरेखाःप्रकुर्वीतव्रतमेतच्छांभवंसर्ववेदेषुवेदवादिभिरुक्तंतत्समाचरेन्मुमुक्षुरपुनर्भ
वाय।अप्रमाणमस्यत्रिःस्थाललाटादाचक्षुषोराभ्रुवोर्मध्यतः।यास्यप्रथमारेखासागा
र्हपत्यश्चाकारोरजोभूर्लोकःस्वात्माक्रियाशक्तिःऋग्वेदःप्रातःसवनंमहेश्वरोदेवता।
यास्यद्वितीयारेखासादक्षिणाग्निरुकारःसत्त्वमंतरिक्षमंतरात्माचेच्छाशक्तिर्यजुर्वेदोमाध्यं

दिनं सवनं स। दा शिवो देवता। यास्य तृतीया रेखा सा आहवनीयो मकारस्तमो द्यौः परमात्मा ज्ञा
नशक्तिः सामवेदस्तृतीयं सवनं शिवो देवता। इति त्रिपुंड्रं भस्मना धारयेत् इति विद्वान् ब्रह्मचारी गृ
हस्थो वानप्रस्थो यतिर्वा स समस्तपातकोपपातकेभ्यः पूतो भवति सर्वान् देवान् ध्यातो भवति सर्वेषु
तीर्थेषु स्नातो भवति स सततं रुद्रजापी भवति सकल भोग भुग् देहं त्यक्त्वा शिवसायुज्यमे
ति न स पुनरावर्तते इत्याह भगवान् कालाग्निरुद्रः। यस्त्वेतद्वाऽधीते स रुद्र एव भवतीत्योंमि
त्युपनिषत्॥ इति कालाग्निरुद्रोपनिषत्॥ ॥अथ संध्याकालः॥ [redacted]ते तिल
दर्भादीननुष्ठानाय याचतः। नानुष्ठानफलं तस्य दातुरेव हि तत्फलं॥ या× जलां× ज्ञवल्क्यः।
अतः परं प्रवक्ष्यामि संध्योपासननिर्णयं। अहोरात्रकृतं पापं ×वद्द× यामुपास्य विमुंचति।
अहोरात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः। सा तु संध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः।
संध्याकाले तु संप्राप्ते यो न संध्यामुपासते। जीवमानो भवेच्छूद्रो मृतः श्वा चैव जायते। का
ले तु वंदिता संध्या स्वर्गमोक्षप्रदायिनी। अकाले वंदिता सा संध्या संध्या वंध्या वधूरिव। बा ॥१८॥
लं वा विना स्नानं संध्याकर्म न संत्यजेत्। दुष्टं कंचित्तिमिं च न कुर्यात् कारणं विना। नक्षत्रदर्श

नमारभ्य सूर्यदर्शनपर्यंतं द्विघटिके प्रातःसंध्याकालः। सूर्यदर्शनमारभ्य नक्षत्रदर्शनपर्यंतं ता
वानेव सायंसंध्याकालः। तथा चोक्तं नापस्तंबेन। उत्तमा तारकोपेता मध्यमा लुप्ततारका। अध
मा सूर्यसहिता प्रातःसंध्या त्रिधा स्मृता॥ इति संध्याकालनिर्णयः। अथ काललोपे प्रायश्चि
त्तं संध्याकाले त्वतिक्रांते स्नात्वाचम्य यथाविधि। जपेदष्टशतं देवीं ततः संध्यां समाचरेत्।
स्मृत्यंतरे। प्राणायामत्रयं प्रातर्द्विगुणं संगवे स्मृतं। मध्याह्ने त्रिगुणं प्रोक्तं अपराह्णे तु षड्गुणं॥
सायाह्ने द्वादशगुणं सूर्यहत्यां ततो व्रजेत्। गौतमः। कालातिक्रमणे चैव त्रिसंध्यमपि सर्वदा
चतुर्थार्घ्यं प्रकुर्वीत शिरो व्याहृतिसंपुटं। जमदग्निः। एकाहं वाप्यतिक्रम्य प्रमादादकृतयादि।
अहोरात्रोषितो भूत्वा गायत्र्याभ्यासमुतं जपेत्। द्विरात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रिगुणं स्मृतं। त्रि
रात्रमपरतश्चैव ब्रह्महा स्यान्न संशयः। यः संध्यां कालतः प्राप्तामालस्यादतिवर्तते। सूर्यहत्याम
वाप्नोति उलूकत्वमवाप्नुयात्। राष्ट्रक्षोभे नृपक्षोभे रोगार्तौ सूतके। संध्यावंदनविच्छि
त्तिर्न दोषाय कदाचन। सूतके मृतके चैव संध्याकर्म न संत्यजेत्। मनसोच्चारयेन्मंत्रान् प्राणा
याम विवर्जितान्। देवाग्नि द्विज अविद्यानां कार्यमहतिसंस्थिते। संध्याहीनेन दोषोऽस्ति येन वा।

सुपपसा ध्यानं। संध्यासीनो ऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत्कुरुते धर्मं न तस्य फलमश्नुते।
स्वर्गेषाम्सं ध्यालोपे व्रतं गायत्र्यष्टसहस्रकमस्ति। इति कालातिपत्तिप्रायश्चित्ते॥ अथ संध्यायां
प्राधान्यनिर्णयः क्रियते। संध्यावंदनकर्मणि ध्यानं प्रधानं मार्जनादिकमंगं। कुत एतदिति चेत्।
सम्यक्प्रकारेण ध्यानं संध्येति संध्याशब्दनिर्वचनात्। ननु संध्याशब्दवाच्यमर्घ्यदानमेव
शास्त्रतत्त्वं। संध्याशब्दो रूढ एवांगीकार्यः सूर्यार्घ्यदानस्यावश्यकत्वात्। आवश्यकत्वं
च स्मर्यते। प्रमादादथवाज्ञाने समीपे ऽर्कोदये यदि। मार्गे वा विषमप्राप्ते रक्षसा चार्घ्यमुत्क्षि
पेत्। तथा च तैत्तिरीयारण्यके रक्षांसि ह वा पुरोनुवाके तपोग्रमतिष्ठंत इत्युपक्रम्य अ
र्घ्यदानप्रशंसारूपार्थवादप्रतिपादनेन तत्रैव विधिरित्येक ~~[illegible]~~ त्यमाने अवयवा
र्थं परित्यज्य अर्घ्यदानाख्ये कर्मणि संध्याशब्दस्य रूढिरंगीकर्तव्या। अवयवव्युत्पत्त्य
पेक्षया रूढौ यद्यपि कल्पनागौरवं तथापि प्रामाणिकगौरवं न दोषायेति न दोषः॥ मैवं॥ सूत
के कर्मणां त्यागः संध्यादीनां विधीयत इत्यादौ संध्याशब्दवाच्यं यद्यर्घ्यदानं स्यात्तदपि ॥१९॥
वर्ज्यं स्यात्। तस्य चावर्ज्यत्वमेव स्मृत्यंतरेषु। अर्घ्यमानसी संध्या प्राणायामविवर्जिता।

अतो यत्संध्याशब्दवाच्यं तदेव सूतके त्यज्यते। तस्मात् ध्यानमेव। यत्तु रक्षसामर्थवादं अर्घ्यदान
स्य प्राधान्यमिति तन्न। अंगेष्वप्यर्थवादश्रवणात्। यथा समिधो यजतीत्यादौ। यदप्युच्यते
रक्षसा चार्घ्यमुत्क्षिपेदित्यावश्यकत्वप्रतिपादकं वचनं तत्त्वन्यांगापेक्षया आवश्यक
त्वं प्रतिपादयति। ननु ध्यानापेक्षया कुतस्तदिति चेत् उच्यते। युधिष्ठिराभिमुखो धृतः सांगो
पांगेन कर्मानुष्ठानासमर्थैः सकलांगपरित्यागेन आदित्योपासनामात्रस्यैव कृतत्वात्। उ
क्तं च भारते। तेऽतथैव महानागदेशिकारणमहं नि। संध्यागतं सहस्रांशुमादित्यमुप
तस्थिरे। दंशिताः सन्नद्धाः संध्यागतं संध्यागतं अहोरात्रसंधिस्थमित्यर्थः। तस्मात्
ध्यानमेव प्रधानं। श्रुतिश्च ध्याने फलमेवमाह। उद्यंतमस्तं यंतमादित्यमभिमुखं ध्या
यन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुते ऽसावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद।
ननु च गायत्रीमंत्रः सवितृदेवताप्रकाशकः। ध्याने च देवतांतरस्य भक्त्या प्रतिपादनात्।
तथा च ब्रह्मपुराणे। प्रातःकाले तु गायत्री सायाह्ने च सरस्वती। सावित्री चैव मध्याह्ने उपास्या
नामभेदतः। प्रातःकाले कुमारी सा मध्याह्ने युवतिर्भवेत्। वृद्धा सायाह्नकाले स्यादुपास्या व

वयसो भिदा। प्रातःकाले ब्रह्मरूपा मध्याह्ने विष्णुरूपिणी। सायं विष्णुस्वरूपास्या उपास्या रू
पभेदतः॥ इत्यादिवचनैः कुमारिकादिभेदैर्ध्यदेवतानां स्येष ध्यानं प्रतीयते न सा विष्णु शिति
मंत्रार्थविरोधः। मैवं। तत्तत्कुमारिकाद्यवस्थाभेदेन सूर्य एव संध्याचाद्यत्वा ध्येयो ध्यायत इत्य
दोषः॥ ॥अथ दिवातीतकर्मणां नियमः। स्मृतिसंग्रहे। दिवोदितानि कर्माणि प्रमादादकृ
तानि च। दिवोदितानि कृत्वैव विदध्यादुत्तराणि च। संग्रहे। शार्वर्याः प्रथमे यामे दिवाक
र्माणि कारयेत्। ब्रह्मयज्ञं च सौरं च वर्जयित्वा विशेषतः। यदा रात्रौ मध्याह्नसंध्यां क
रोति तदा गायत्र्यार्घ्यं दद्यात्। उदुत्यमिति स्थाने हा विष्णां तमिति सूक्तं जपेदिति विशेषः।
संध्याकालातिक्रमे सशिरस्कया सव्याहृतिकया गायत्र्याभिमंत्रितं अर्घ्यं दद्यात्। ततः
सायमुपासनं तत्र प्रातरुपासनवत्। अत्रा[redacted]त्र्याः प्रथम एव प्रहरः कृतो गम्यते द्वितीय
स्तृतीये प्रहरे महानिशेति कन्यादानाधिकरणे उच्यते तत्रा चमनस्यापि निषेधात्। अत्र
वृहद्वसिष्ठः। ऊर्ध्वपुंड्रविहीनस्तु यस्तु संध्यादिकं चरेत्। तत्सर्वं राक्षसा हंति नरकं चाधि ॥२०॥
गच्छति॥ अथ प्राणायामलक्षणं। स्मृतिसारे। दक्षिणे रेचनं कुर्याद्वामेना पूर्य चोदरं॥

कुंभकेन जपं कुर्यात् प्राणायामः स उच्यते। पंचांगुलीभिर्नासाग्रपीडनं प्रणवाभिध्या। मुद्रेयं सर्व
पापघ्नी वानप्रस्थगृहस्थयोः। कनिष्ठानामिकांगुष्ठैर्नासाग्रस्य प्रपीडनं। ॐकारमुद्रा सा प्रोक्ता
यतेश्च ब्रह्मचारिणः। विश्वामित्रः। अंगुष्ठानामिकाभ्यां च कनिष्ठाच तृतीयका। प्राणाया
मः स विज्ञेयस्तर्जनीमध्यमां विना। याज्ञवल्क्यः। गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकां॥
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते। संग्रहे। दश प्रणवसंयुक्तां गायत्रीं शिरसा सह।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते। आदावंते च गायत्र्याः प्राणायामास्त्रयस्त्रयः।
संध्यादावर्घ्यदाने च प्राणायामैक उच्यते॥ इति प्राणायामलक्षणं। अथ संध्याविधिः॥
प्राणानायम्य संप्रोक्ष्य मंत्रेणाद्भिस्तु दैवतेन तु। सायमग्निश्च मेत्युक्त्वा प्रातः सूर्येत्यपः पिबेत्।
अत्र विशेषो मार्कंडेयपुराणे। आपो हिष्ठेति ऋग्भिश्च मार्जनं तु कुशोदकैः। प्रतिप्रणवसंयुक्तं
क्षिपेन्मूर्ध्नि पदे पदे। अत्रोक्षिप्रः क्षिपेदूर्ध्वं मध्ये यस्य क्षयाय चेति। पदे पद इति पादांते पादांते
एतन्मार्जनं संकल्पानंतरं स्यात्। नवप्रणवयुक्तेन आपो हिष्ठेति ऋग्भिश्च मार्जनं कुशास्य र्यश्च
नेति मंत्रेणाभिमंत्रितं पयः पीत्वा द्विराचामेत्। तथा च शौनकः। नवप्रणवयुक्तेन आपो हिष्ठा

य येन तु । संवत्सरकृतं पापं मार्ज्जनात्तेन विशुध्यति । अथ प्रकृतं । आपो हि ष्ठेति सप्त
नमार्जनं च कुशोदकैः । पुरस्य ...याये । इति जलं सकुशं प्रक्षिपेत् ... पादांते मार्जनं कुर्यात्
दहचेति तथैव च । ऋगंते च तथा कुर्याद्दिषीणां मतमीदृशं । तरत्समंदीति मार्जनं कुर्यादि
ति केचित् । स्मृतिसारे । आपो हिष्ठाद्यैर्वेदयतैर्मार्जनं कृत्वा ओं च तस्मिन् । स्नानं परि
षिच्य । अशुद्धदेशे धारांबु मार्जनं परिवर्जयेत् । भूमौ हस्तं प्रतिष्ठाप्य मार्जनं चैव कारयेत् ।
न कुर्याद्यदि मूढात्मा रौरवं नरकं व्रजेत् । आपस्तंबः । गंगायां वापिकायां
च तडागे च तथैव च । वामहस्ते जलं गृह्य न कुर्यान्मार्जनं द्विजः । पात्रस्थितोदके नैव
वामहस्तोदके न वा । संध्यायां मार्जनं कुर्यान्नान्यथेत्यब्रवीन्मनुः । इति गर्गविष
यं । गृहे व्यतिरिक्ते तु जलस्थ एव मार्जनं कुर्यात् । तथा च संवर्तः । ईदृशं कृत्वा
तु संकल्पे कुशानादाय पाणिना । नद्यां नद्युद्धृते स्तोये गृहे वामकरे स्थिते ॥
पदं ध्येमार्जनं च ब्रह्महत्यादितत्समं । तथा च वासिष्ठः । उद्धृतोदके नद्यां संध्यापदम ॥२२॥
ध्येच मार्जनं । उपविश्य तु यत्कार्यं तत्सर्वं निःफलं भवेत् । मनुः । वामहस्ते जले

धृत्वा येन तु संध्यामुपासते । सा संध्या वृषली ज्ञेया असुरास्तेन तृप्यति । नदीविषयमेतत् । स्मृतिसारे ।
मार्जनं तर्पणं श्राद्धं न कुर्याद्धारिधारया । करोति यदि मूढात्मा तत्सर्वं निःफलं भवेत् । कृतं चेत्यघम
र्षणं कृत्वा चामेत् । अघमर्षणप्रकारः स्मृ. स्नानप्रकरणे उक्तः । काशीखंडे । गायत्रीं शिरसा हीनां
महाव्याहृतिपूर्विकां प्रणवाद्यां जपंस्तिष्ठन् क्षिपेदंजलित्रयं । तेन वज्रोदकेनाशु मंदेहा ना
म राक्षसाः । सूर्यारयः प्रलीयंते शैला वज्राहता इव । काललोपो न कर्तव्यो द्विजेन स्वहितैप्स
ना । अर्घ्यं दद्यात्समये तस्माद्वज्रोदकं क्षिपेत् । वृद्धमनुः । कराभ्यां तोयमादाय गायत्र्या
चाभिमंत्रितं । आदित्याभिमुखस्तिष्ठन् त्रिरूर्ध्वं संध्ययोः क्षिपेत् । तर्जन्यंगुष्ठयोर्योगे रा
क्षसी मुद्रिका स्मृता । राक्षसी मुद्रिकार्घ्ये चेत्तत्तोयं रुधिरं भवेत् । द्वौ पादौ तु समौ कृत्वा पू
रयेदुदकांजलिं । गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् । पक्षांतरं । ईषन्नम्रः प्रभाते तु
मध्याह्ने ऋजु संस्थितः । द्विजोऽर्घ्यं प्रक्षिपेद्देव्या सायं चोपविशन् भुवि । प्रातर्मध्याह्निकीं सं
ध्यां तिष्ठन्नेव समापयेत् । उपविश्य तु सायाह्ने जलेष्वर्घ्यं न [illegible]नि क्षिपेत् । मंदेहानां विना

ग्रायनिक्षिपेज्जलेंजलीनत्र। प्रायश्चित्तार्थमाचम्यमुच्यते दैत्यहत्यया। पूर्वां तारकाभि
मुखः प्रातः प्रयतमानसः। जपंस्तिष्ठति सावित्रीं संध्यां तां सकलां ततः। पूर्वसंध्यां जपंस्ति
ष्ठेत्सावित्रीमर्कदर्शनात्। पश्चिमां तु समासीनः सम्यगृक्षदर्शनात्। तथा च गर्ग्ये। यज्ञोप
वीती नित्योदकः संध्यामुपासीत वाग्यतः। सायमासीन उत्तरापरमभिमुखो न्वष्टमदेशं सावि
त्रीं जपेदा दृष्टिस्थिमितमंडलमानक्षत्रदर्शनात्। एवं प्रातः प्राङ्मुखस्तिष्ठन्नादित्यमंडलदर्श
नात्। अस्यार्थः। नित्योदकः स्मृत्युक्तोदककर्मेत्यर्थः। तेन मार्जनादिकं कार्यं। एतावत्संध्याद्
यसमानं। सायंकाले उत्तरापरमभिमुखो यवायव्याभिमुख आसीनः अर्द्धास्तमितमंडल
मारभ्य नक्षत्रदर्शनपर्यंतं जपेत्। तिष्ठन्निति वचनमुपवेशननिवृत्त्यर्थं। अन्वष्टमदेशा
भिमुखो वा। प्रातः संध्याजपं तिष्ठन्नेव कुर्यादित्यर्थः। तथा च स्कांदे। पूर्वां संध्यां जपंस्तिष्ठ
न्नैशं पापं व्यपोहति। पश्चिमां तु समासीनो मलं हंति दिवाकृतमिति। तथा च। प्रातर्मध्याह्नि
कीं संध्यां तिष्ठन्नेव समापयेदित्युक्तं पूर्वमेवार्घ्यदानप्रकरणे। व्यासोपि। प्रातर्मध्याह्न ॥२२॥
यो स्तिष्ठन्गायत्रीं जपमारभेत्। ऊर्ध्वजानुस्तु सायाह्ने ध्यानालोकनतत्पर इति। रुद्रयोगी। सा

दित्या उत्तमा संध्या मध्यमा स्तंगते रवौ। जघन्या च सनक्षत्रा सायंसंध्या त्रिधा मता। उत्तमा तु स
नक्षत्रा मध्यमा लुप्ततारका। जघन्या चोदिते सूर्ये प्रातःसंध्या त्रिधा मता। स्मृत्यंतरे विशेषः।
पूर्वां संध्यां जपंस्तिष्ठेदुपासीनस्तु मध्यमां। न चांतरा व्याहरेत्तु विरमेद्वा कथंचन। अथ गाय
त्रीजपविधिः। योगी। ॐकारं पूर्वमुच्चार्य भूर्भुवः स्वस्तथैव च। गायत्रीं प्रणवं चांते जपो
प उदाहृतः। अंते अपावंनोच्चार्यमिति। काशीखंडे। केषस्य वचने प्रोक्ता गायत्री त्रिपदा परा। ति
सृभिः अ...न्या भिर्महाव्याहृतिभिः सह। सहस्रं साधिकं ... जपंश्चैव त्रिकालमो। त्रि
वर्णमथ चोंकारं भूर्भुवः स्वरिति त्रयं। पादत्रयं च सावित्र्याः त्रयो वेदा अहं ... एतदक्ष
र...मेकार्थं जपन्व्याहृतिपूर्विकां। संध्ययोर्ब्रह्मवित् विप्रो वेदपुण्येन युज्यते। गायत्रीं
यो न जानाति वृथा तस्य परिश्रमः। एकतश्चतुरो वेदाः सांगोपनिषदः ... एकतश्चैव
गायत्री तुल्यरूपा भवेत्पुरा। सर्वेषामेव पापानां संकरे समुपस्थिते। दशसाहस्रिकोभ्या
सो गायत्र्याः शोधनं परं। शातातपः। ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत्। वानप्रस्थो
यतिश्चैव सहस्राधिकं जपेत्। मनुः। मध्यमानामिकामध्यपर्वद्वितयकल्पितं। मेरुं प्रदक्षि

णी कुर्यात्तु नामी मूलपर्वतः। आरभ्य मध्यमामूलपर्वांतं गणयेत्क्रमात्। अंगुलीर्न वियुंजीत किं
चित्संकुंचितेतले। अंगुलीनां वियोगे तु छिद्रेषु स्रवते जपः। गणनाविधिमुल्लंघ्य यो जपेत्तं
जपं फलं। गृह्णंति राक्षसास्तेन गणयेत्सर्वथा द्विजः। अंगुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी
मध्यमा धनदा शांतिं करोत्येषा अनामिका। कनिष्ठा रक्षणी प्रोक्ता जपकर्मणि शोभने। गा
यत्री पार्वती ज्ञेया ॐकारः पुरुषः शिवः। तयोः संयोगो यस्तत्र तस्मात्सूत्रेण वेष्टयेत्॥ इति
गायत्रीजपविधिः॥ अथ जपस्थानं। गृहे जपं समं विद्यात् गोष्ठे शतगुणं तथा। पुण्यारण्ये
तथारामे सहस्रगुणितं विदुः। अयुतं पर्वते पुण्ये नद्यां लक्षमुदाहृतं। कोटिं देवालये प्राहुरन
नंतं शिवसन्निधौ। सूर्यस्याग्रे गुरोरिंदोर्[illegible]स्य च जलस्य च। विप्राणां च गवां चैव सन्नि
धौ शस्यते जपः। अश्वत्थमूलमाश्रित्य दीप×स्य जपो होमः सुरार्चनं। अक्षय्यं फलमा
प्नोति ब्रह्मणो वचनं यथा। पारिजातके। प्रातर्नाभौ करौ कृत्वा मध्याह्ने हृदि संस्थितौ॥ ॥२३॥
सायं जपस्तु नासाग्रे त्रिसंध्यं जपलक्षणं। उत्तानतिर्यङ्न्युब्जस्तौ नाभिहृन्नासिकास्थि
तौ। प्रातर्मध्याह्नसायेषु कृत्वा देवीं क्रमाज्जपेत्। दानखंडे। प्रणवव्याहृतीपूतां गायत्रीं निरताः सदा।

मनसा कर्मणा वाचा धर्मस्यैवानुचिंतकाः। न पापमतिमिच्छंति ते नराः स्वर्गगामिन इति॥ अ
थ जपनिषेधनिमित्तानि। उष्णीषी कंचुकी नग्नो मुक्तकेशो गलावृतः। अपवित्रकरोऽशुद्धः
प्रलपन्न जपेत्क्वचित्। अप्रावृतकरो यस्तु शिरसा प्रावृतोऽपि च। चिंताकुलितचित्तो वा
क्रुद्धो भ्रांतः क्षुधान्वितः। अनासनः शयानो वा गच्छन्नुत्थित एव च। रथ्यायामशिव
स्थाने न जपेत्तिमिरांतरे। उपानद्गूढपादो वा यानशय्यागतस्तथा। प्रसार्य न जपेत्पादौ कु
क्कुटासन एव च। पतितानामंत्यजानां दर्शने भाषणे श्रुते। क्षुते ष्ठीवे वायुगमने जृंभणे जप
मुत्सृजेत्। आचम्य वा चरेत्तेषां प्राणायामं षडंगकं। कृत्वा सम्यग्जपेच्छेषं। यद्वा सूर्या
दिदर्शनं। मार्जारकुक्कुटक्रौंचश्वानशूद्रखरकपीन्। दृष्ट्वाचम्याचरेत्कर्म स्पृष्ट्वा स्नानं विधी
यते॥ अथ जपमालाविधिः। मोक्षदा पंचविंशत्या त्रिंशद्भिर्धनसिद्धिदा। सर्वार्थे पंचविं
शत्या पंचदशभिरभिचारिके। पंचाशद्भिः काम्यकर्मसिद्धिः स्याच्चतुरुत्तरैः। अष्टोत्तरशता
तैः सर्वसिद्धिरक्षैः कृतस्रजा। शंखाक्षमणयः श्रीदाः स्फाटिको मोक्षदः परः। पद्माक्षाः पु
त्रलक्ष्मीदा रुद्राक्षा भुक्तिमुक्तिदाः। पुत्रजीवमयाः पुत्रधनधान्यसमृद्धिदाः। विद्रुमा च

शंखचंदनजाः सौभाग्यार्थे च मौक्तिकाः। पापक्षयाय कुशमयाः कामदाः स्वर्णरौप्यजाः। प्रवालमुक्ता
स्फटिकैर्जप्तं कोटिफलप्रदं। तुलसीमणिना येन गणितं चाक्षयं फलं। अन्योन्यसमरूपा
णि नातिस्थूलकृशानि च। जंतुभिर्न विशीर्णानि न जीर्णानि नवानि च। गव्ये रूपं च भिन्नानि
निसंस्थाप्य त्वेकैकं पृथक्। ततो हि जेंद्र सुणपष्टीनि भिन्नं ग्रंथिवर्जितं। त्रिगुणं रूप्यत
तूनं संप्रक्षाल्य च पूर्ववत्। मणिमेकैकमादाय सूत्रेण तु योजयेत्। मुखे मुखं तु संयो
ज्यं पुच्छे पुच्छं तु योजयेत्। गोपुच्छवज्जपमालां कारयेज्जपकर्मणि। एकैकं मणिबंधे
तु ग्रंथिबंधं प्रकल्पयेत्। स्वयं ग्रथिता माला शक्रस्यापि श्रियं हरेत्। स्वयं विरचितं को
ग्रंस्थयं पंचगव्ये च चंदने। स्वयं विरचिता माला शक्रस्यापि श्रियं हरेत्। गुरुहस्तेन कुर्व
तस्त्रियाहस्तेन धैव च। कुंकुमं संपूज्य ताः हस्ता [illegible] यात्सर्वसिद्धये। मध्यमायां मपुमालां ॥२४॥
ज्येष्ठेनावर्तयेत् क्रमात्। भुक्तिमुक्तिप्रदः सोयं मालिकागणनक्रमः। जप्त्वाक्षमालां स
कृत्वा भ्रामयेद्दक्षिणामणिं। पुनर्मालां समावर्त्य जपं कुर्यात्तु निश्चलं। जपस्यांते च
तां मालां पूजयित्वा प्रगोपयेत्। अंगुली जपसंख्यानमेकमेकगुणं भवेत्। रेखयाष्ट

गुणं प्रोक्तं पुत्रजीवैर्दशाधिकं। शतं स्याच्छंखमणिभिः प्रवालैस्तु [illegible] सहस्रकं।
स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते। पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते। कु
शग्रंथ्या च रुद्राक्षैरनंतफलमश्नुते। अन्येन पद्माक्षमालाभिर्जपस्य गुणितं फलं। तां
गुलि जपं कुर्वन् संगुष्ठांगुलिभिर्जपेत्। अंगुष्ठेन जपेज्जाप्यमन्यैरंगुलिभिः सह। अं
गुष्ठेन विना जाप्यं कृतमप्यकृतं भवेत्॥ अथ प्रशंसा। विधिकृतो दशगुणो जपः क
तुरूपिरितः। उपांशुस्तच्छतगुणः सहस्रो मानसस्तथा। न दोषो मानसे जाप्ये सर्वदेशेपि
सर्वदा। उपांशु निजकर्णैकगोचरः सिद्धिदो जपः। उच्चसंख्या जपं कुर्यात् मानसोपां
शु [illegible] वाचिकं। संख्यापूर्णे निजद्रव्येर्जुहुयाद्दशांशतः। ततो होमदशांशं तु त
र्पणं तु समाचरेत्। स्वाभिषेकाघमर्षौ च पूर्ववत्तद्दशांशतः। ततो महतीं पूजां कुर्यात्
ब्राह्मणभोजनं। रक्तपुष्पैश्चरणतः प्रसन्नां देवतां भजेत्। ग्रहणे कस्य चैव देवी श्रुचिः
रूपमुपोषितः। नद्यां समुद्रगामिन्यां नाभिमात्रे जले स्थितः। ग्रहणान्मोक्षपर्यंतं जपेन्मंत्रं
समाहितः॥ अथ प्रयोगः॥ द्विराचम्य। प्राणायम्य प्रजापतिः ऋषिः परब्रह्म देवता देवीगायत्री

छंदः प्राणायामे विनियोगः। व्याहृतीनां सप्तानां विश्वामित्रजमदग्निभरद्वाजगौतमात्रि
वसिष्ठकश्यपा ऋषयः। गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदांसि। अग्निवा
युसूर्यबृहस्पतिवरुणेंद्र[illegible]विश्वेदेवा देवताः। गायत्र्या गायत्री छंदः विश्वामित्रऋषिः स
विता देवता। आपोज्योतिरिति शिरोमंत्रस्य प्रजापतिऋषिः ब्रह्माग्निवायुसूर्या देवताः
प्राणायामे विनियोगः। ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्स
वितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्। ॐ मापो ज्योतीरसोऽमृतं ब्रह्म भू
र्भुवः स्वरोम्॥ उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीतये प्रातःसंध्यामुपासिष्ये। आपो
हिष्ठेति त्र्यृचस्य सिंधुद्वीप ऋषिः आपो देवता गायत्री छंदः। मार्जने विनियोगः। कुशा
वैनप्रतिवारं प्रणवपूर्वं नव वारं शिरसि मार्जनं कुर्यात्। सूर्यश्चेति मंत्रस्य याज्ञवल्क्योप
निषदृषिः सूर्यमन्युमन्युपतिरात्र्यो देवता प्रकृतिश्छंदः प्रातःसंध्याचमने विनियोगः। सूर्य
श्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापमकार्षं मनसा वाचाह ॥२५॥
स्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु यत्किंचदुरितं मयि इदमहं मामममृतयोनौ

सूर्ये ज्योतिषि जुहोमि स्वाहा। इत्यपः पीत्वा द्विराचम्य। गायत्र्या जलमभिमंत्र्या। मिमंत्र्य आ
पो हिष्ठेति नवर्चस्य सूक्तस्य अंबरीषः सिंधुद्वीप ऋषिः आपो देवता गायत्री छंदः। पंचमीव
र्द्धमाना सप्तमी प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ मार्जने विनियोगः। आपो हिष्ठा मयो भुव इति नवर्चेन
सखुषीरिति परिसृष्ट्या चमार्जनं कुर्यात्। केचिद्द्रुपदयापि मार्जयंति। द्रुपदेत्यस्य द्रुपद ऋषिः
वरुणो देवता अनुष्टुप्छंदः मार्जने विनियोगः। द्रुपदादिवेन्मुमुचानः स्विन्नः स्नातो मला
दिव। पूतं पवित्रेणेवाज्यं आपः शुंधंतु मैनसः। तरत्समंदीत्यादिभिश्चतुर्भिः केचित्। तर
त्समंदीति चतुर्ऋचस्य सूक्तस्य अवत्सार ऋषिः सोमः पवमानो देवता गायत्री छंदः मार्जने
विनियोगः तरत्समंदी धावति०॥ ऋतं च सत्यं चेत्यस्य माधुच्छंदसोऽघमर्षण ऋषिः भाववृत्त
देवता अनुष्टुप्छंदः अघमर्षणे विनियोगः। ऋतं चेति त्र्यृचेन करस्थजलं नासिकाग्रेण
वामभागे त्यजेत्। ततः सकृदाचम्य प्राणायामं कृत्वा सप्तव्याहृतिकया गायत्र्या त्रिवारमर्घ्यं
दद्यात्। ततः असावादित्यो ब्रह्मेत्युदकं परितः क्षिप्त्वा प्रदक्षिणं परिक्रम्याचमनं कुर्यात्। तथा
च श्रुतिः। यत्प्रदक्षिणं परिक्रमंतीति तेनैव पाप्मानमवधुन्वंतीति। [illegible] योगी याज्ञवल्क्यः। जेत्यात्

कोद्योर्हे कोटी चमंदेहानामरक्षसाः ।कृतच्छादारुणा चाराः सूर्यमिच्छंतिरवादितुं ।ततो देवगणाः
सर्वे ऋषयश्च तपोधनाः ।उपास्ते संध्यां च प्रक्षिपंत्युदकांजलीन् ।दह्यंते तेन ते दैत्या वज्रीभूतेन
वारिणा ।१। अथास्त्रोपसंहरणमंत्रः ।अस्त्रोपसंहरणमंत्रस्य ब्रह्मऋषयः सवित भार्गव ऋ
षिः ।८ सूर्यो देवता देवी गायत्री छंदः अस्त्रोपसंहरणे विनियोगः ।अग्नये हृदयाय नमः ।वायवे
शिरसे स्वाहा ।सूर्याय शिखायै वौषट् ।ब्रह्मणे कवचाय हुं ।विष्णवे नेत्रत्रयाय वौषट् ।रुद्रा
य अस्त्राय फट् ।ॐ आवाहयाम्याया वाय म्याया ॐ वं र वायव्याय वा॰ यव्योसि पाप्मानं मे छिं
धि रें क्लैं सो ब्रह्मण्यः स्थिरांचिने कर्मजाते षिते ।जगत्पवित्रे स्तु तपेस पवित्रे भास्वते नमः ।नाराय
णाय सोहमर्कममहं ज्योतिरर्कज्योतिरहं ।आत्मज्योतिरहं सर्वज्योतिरहं शिवः ।इत्यस्त्रोपसं
हरणं ।अथ तर्पणं ।प्रातःकाले गायत्री विश्वामित्रऋषिः ब्रह्मा देवता त्रिष्टुप्छंदः भूत
पेपानतं करिष्ये ॐ भूः पुरुषं तर्पयामि ।गायत्रीं त॰ ऋग्वेदं त॰ मंडलं त॰ सांकृतिं त॰ संध्यां त॰
कुमारीं त॰ ब्राह्मीं त॰ उषसीं॰ निर्मृजीं त॰ सर्वार्थसिद्धिकरीं त॰ सर्वमंत्राधिपां त॰ ॐ भूर्भुवः स्वः ॥२६॥
पुरुषं तर्पयामि ।शिखाबंधनं ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने ।तिष्ठ देवि शिखाबं
धे चामुंडे ह्यपराजिते ।इति गायत्र्या शिखां बध्नीयात् ।ततो गायत्रीजपं कुर्यात् ।तत्रादौ

सनवंध्यः ।तत्रमंत्रः ।ॐ रक्षिति विहरन्नपानि भूमौ तिष्ठंतु भूपतिः ।भूतानामविरोधेन ब्रह्मकर्मसमा
रभे ।इति मही पार्थ्यः ।पृथ्वीतिमंत्रस्य मेरुपृष्ठ ऋषिः कूर्मो देवता सुतलं छंदः आसने विनियो
गः ।पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।त्वं च धारय मां देवि पवित्रं कुरु चासनं ।
विश्वेश्वरायै नमः ।मायाशक्त्यै नमः ।अंतरिक्षं [illegible] तोतरिता अरातयः ।ॐ भूर्भुवः स्वः स्वाहा
आत्मासनाय नमः इत्यासनं परिकल्प्य ।अथ भूतशुद्धिः ।अपक्रामंतु भूतानि पिशाचाः स
र्वतो दिशं ।सर्वेषामविरोधेन ब्रह्मकर्मसमारभे ।अपसर्पंतु ये भूता ये भूता भुविसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ।इति भूतान्यपसार्य ।सर्वभूतनिवारणाय [illegible]
शराय [illegible] राजाप सुदर्शनाय हुं फट् इति तालत्रयं दिग्बंधं चाग्निप्राकारत्रयं कुर्यात् ।इति
ह [illegible] गसंकोचेन ।दुष्टभूता निर्गच्छतो ध्यात्वा वामपादतले नास्त्रमु [illegible]
ते नैमानस्त्र [illegible] लेनां [illegible] अस्त्रलिंगम [illegible] दिव्यान् भूतान् उत्सार्य मनसाभू त
मसारं कुर्यात् ।श्री गुरुभ्यो नमः ।गुरुपादुकाभ्यो नमः ।परमगुरुभ्यो नमः ।परमगुरुपादुकाभ्यो
नमः ।परापरगुरुभ्यो नमः ।परापरगुरुपादुकाभ्यो नमः ।परमेष्ठिगुरुभ्यो नमः ।परमेष्ठिगुरुपादुकाभ्यो नमः

ॐ नमो महद्भ्यः। मूलाधारस्थितं जीवं प्रदीपकलिकाकृतिं। प्रणवेन समारोप्य नादब्रह्मणि
वेशयेत्॥ पादादिजानुपर्यंतं पृथिवीस्थानं पीतवर्णं चतुरस्रं चतुष्पथवज्रलांछितं पृथि
नगंधरूपरसस्पर्शशब्दगुणं ब्रह्माधिष्ठितं निवृत्तिकलान्वितं सद्योजातादिदेवतं लंबी
जमध्यमं संचित्य। लकारस्य प्रजापतिर्ऋषिः देवी गायत्री छंदः रुद्रो देवता पृथिवीभू
जपे तशुद्ध्यर्थे विनियोगः। ॐ लं ॐ हूं फट् नमः इति पंचोद्घातनेन रुध्वा तदंते पृथिवीमंडलं
आप्यमंडले संहरामि नमः इति संहरेत्। जान्वादिनाभिपर्यंतमपां स्थानं शुक्लवर्णमर्द्धचं
द्राकारं द्रवरूपं रसरूपस्पर्शशब्दगुणं विष्ण्वधिष्ठितं प्रतिष्ठाकलान्वितं वामदेवाधिदे
वतं वंबीजमध्यमं संचित्य वकारस्य गौतम ऋषिः त्रिष्टुप् छंदः वरुणो देवता उदकभूत
शुद्ध्यर्थे विनियोगः। ॐ वं ॐ हूं फट् इति चतुरुद्घातनेन रुध्वा। तदंते आप्यमंडलं वह्नि ॥२७॥
मंडले संहरामि नमः इति संहरेत्। नाभ्यादिकंठपर्यंतं आग्नेयमंडलं रक्तवर्णं त्रिको
णं स्वस्तिकलांछितं ऊष्मरूपस्पर्शशब्दगुणं रुद्राधिष्ठितं विद्याकलान्वितं अघोराधिदै
वतं रंबीजमध्यमं संचित्य रकारस्य कश्यप ऋषिः जगती छंदः जातवेदाग्निर्देवता अग्नि

भूतशुद्ध्यर्थे विनियोगः। ॐ रं ॐ हूं फट् इति त्रिरुद्घातनेन रुध्वा वह्निमंडलं वायुमंडले संहरामि नमः इ
ति संहरेत्। कंठादिभ्रूमध्यपर्यंतं वायुमंडलं धूम्रवर्णं षट्कोणं षड्बिंदुलांछितं चलनस्पर्शशब्दगुणं
ईश्वराधिष्ठितं शांतिकलान्वितं तत्पुरुषाधिदैवतं यंबीजमध्यमं संचित्य यकारस्य कण्व ऋ
षिः बृहती छंदः मरुतो देवता वायुभूतशुद्ध्यर्थे विनियोगः। ॐ यं ॐ हूं फट् इति द्विरुद्घातनेन रुध्वा वायु
मंडलं आकाशमंडले संहरामि नमः इति संहरेत्। भ्रूमध्यादिब्रह्मरंध्रपर्यंतं व्योममंडलं धूम्रवर्णं वृत्ता
कारं ध्वजलांछितं सुषिरशब्दगुणं सदाशिवाधिष्ठितं शांत्यतीतकलान्वितं ईशानाधिदै
तं हंबीजमध्यमं संचित्य हकारस्य ब्रह्मा ऋषिः देवी गायत्री छंदः परमात्मा देवता आकाश
भूतशुद्ध्यर्थे विनियोगः। ॐ हं ॐ हूं फट् इति सकृदुद्घातनेन रुध्वा आकाशमंडलं परमात्मनि सं
हरामि नमः इति संहरेत्। आकाशं च तन्मात्राहंकारमहदात्मिकायां मातृकासंज्ञ ब्रह्मस्व
रूपायां हल्लेखायां परदेवतायां प्रकृतिरूपमायायां प्रविलापयामि। तथा मूलमायां नित्यशुद्धबुद्धमु
क्तस्वभावे स्वप्रकाशरूपे सत्यज्ञानानंदलक्षणे परमकारणे परमार्थभूते परब्रह्मणि प्रविला
पयामि समस्तदेहादिप्रपंचं परब्रह्मणि प्रविलाप्य तच्च नित्यशुद्धबुद्धमुक्तस्वभावं सच्चिदानंद

स्वरूपंपरिपूर्णंपरंब्रह्मैवाहमस्मीति भावयेत्। एवं ध्यात्वा यथोक्तस्वरूपात्सर्वज्ञानेश्वर्य
युक्तात्परमात्मकात्परब्रह्मणः सकाशात् हल्लेखार्थभूत सर्वमंत्रमयमातृकासंसकरूपा
त्मिका महदहंकारादिपंचतन्मात्रादिसमस्तप्रपंचकारणभूता प्रकृतिरूपा माया रज्जुसर्पव
द्विवर्तरूपेण प्रादुर्भूतेति ध्यात्वा तस्या मायायाः सकाशात् अहंकारपंचतन्मात्रद्वारेण
व्युत्क्रमात् आकाशादुत्पन्नं आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी समभायवेति
ध्यात्वा तेभ्यः पंचमहाभूतेभ्यः सकाशात् स्वशरीरं तेजोमयं पुण्यात्मकं सर्वपुरुषार्थसाध
नंदेश्वराराधनयोग्यमुत्पन्नमिति ध्यात्वा तस्मिन्शरीरे स्वात्मकं सर्वज्ञं सर्वशक्तिसमन्वि
तं सर्वमंत्रदेवतामयं सच्चिदानंदस्वरूपं परब्रह्मात्मरूपेणानुप्रविष्टं चिन्तयामीति भावयेत्।
एषा भावनात्मक्या भूतशुद्धिः॥ अथ प्राणायामविधिः। ॐ गोविंदायनमः अंगुष्ठयोः।
ॐ तर्जन्योर्महीधरायनमः। मध्यमयोर्हृषीकेशाय। अनामिकयोस्त्रिविक्रमाय। कनिष्ठि
कयोर्विष्णवे। करतलपृष्ठयोर्माधवाय नमः। प्रणवस्य प्रजापतिर्ऋषिः परब्रह्मदेवता दै ॥२८॥
वीगायत्रीछंदः। ॐ बीजं ॐ शक्तिः मं कीलकं विद्युद्वर्णं उदात्तः स्वरः तालव्यं गोत्रं। [illegible]

प्रणवमात्राणां वसिष्ठविश्वामित्रभरद्वाजा ऋषयः। ब्रह्मविष्णुमहेश्वरा देवताः। गायत्रीत्रिष्टु
ब्जगत्यश्छंदांसि। भूरंतरिक्षद्यौः स्थानानि। गार्हपत्यदक्षिणाग्न्याहवनीया रूपाणि पीतवि
द्युद्वर्णाः। ऋग्यजुःसाम [illegible] स्थाः। व्याहृतीनां विश्वामित्रजमदग्निभरद्वाज
गोतमात्रिवसिष्ठकश्यपा ऋषयः। अग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः।
गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदांसि। श्वेतश्यामपीतपिशंगनीललोहि
तकृष्णा वर्णाः। षड्जर्षभगांधारमध्यमपंचमधैवतनिषादाः स्वराः। पृथिव्यप्तेजोवाय्वाका
शादिगम्यानोदीजानि। श्रीं ह्रीं ह्रीं माया इति मध्यास्त्रीवाचः शक्तयः। अग्निर्वैश्यका
श्यपगौतमांगिरस [illegible] गार्ग्यकौशिककात्यायनिहारितगोत्राणि। शब्दस्पर्शरूपरसगंधमनो
बुद्धयस्तत्त्वानि। विततसमाज्यलिंग [illegible] वसंतयनपात्राधितव्या पंचमुद्राः। प्राणा
पानव्यानोदानसमानमनोबुद्धिजनितपापोपशमने फले॥ मध्यमगायत्र्या गायत्रीछं
दः। विश्वामित्रऋषिः सविता देवता॥ शिरसः प्रजापतिर्ऋषिः परमात्मा देवता त्रिष्टुप्छंदः।
सर्वः स्वरः दीप्तो वर्णः प्राणायामे विनियोगः। ॐ अंगुष्ठाभ्यां नमः। ॐ हृदयायनमः। ॐ नमुरसे

यनमः। ॐ भूः पादाभ्यांनमः। ॐ भुवः जानुभ्यांनमः। ॐ स्वः गुह्यायनमः। ॐ महः नाभ्यैनमः। ॐ ज
नः हृदयायनमः। ॐ तपः कंठायनमः। ॐ सत्यं मूर्ध्नेनमः। ॐ तत्सवितुर्ब्रह्मात्मने हृदयायनमः।
वरेण्यं विष्ण्वात्मने शिरसे स्वाहा। भर्गोदेवस्य ज्योतिरात्मने शिखायै वषट्। धीमहि परमात्म
ने कवचाय हुं। धियोयोनः ज्ञानात्मने नेत्रत्रयाय वौषट्। प्रचोदयात् सर्वात्मने अस्त्राय फट्।
आपस्तनाभ्यांनमः। ज्योतिर्नेत्राभ्यांनमः। रसो जिह्वायैनमः। अमृतं ललाटायनमः। ब्रह्म
भूर्भुवः स्वरोम् कवचाय हुं। ततस्त्रीन् प्राणायामान् कृत्वा प्रणवस्य प्रजापतिर्ऋषिः परं
ब्रह्मदेवता दैवी गायत्रीछंदः। गायत्र्या गायत्रीछंदः विश्वामित्रऋषिः सविता देवता।
वरइति बीजं। यमिति शक्तिः। णकारः साधारणी शक्तिः। श्वेतो वर्णः। अग्निर्मुखं ब्रह्मा
शिरः विष्णुर्हृदयं रुद्रो ललाटं पृथ्वी कुक्षिः। त्रैलोक्यं चरणाः। सांख्यायनगोत्रं त्रिपदा
गायत्री समस्तपापक्षयार्थं अष्टोत्तरशतसंख्याकं गायत्रीजपं करिष्ये तत्र सर्वेषां व्या ॥२८॥
पकं कृत्वा। ॐ भूः अंगुष्ठाभ्यांनमः। ॐ भुवः तर्जनीभ्यांनमः। ॐ स्वः मध्यमाभ्यांनमः।
ॐ तत्सवितुर्वरेण्यं अनामिकाभ्यांनमः। भर्गोदेवस्य धीमहि कनिष्ठिकाभ्यांनमः। धियोयोनः

प्रचोदयात् करतलकरपृष्ठाभ्यांनमः। तत्सवितुर्वरेण्यं हृदयायनमः। भर्गोदेवस्य धीमहि शि
रसे स्वाहा। धियोयोनः प्रचोदयात् शिखायै वषट्। तत्सवितुर्वरेण्यं कवचाय हुं। भर्गोदेव
स्य धीमहि नेत्रत्रयाय वौषट्। धियोयोनः प्रचोदयात् अस्त्राय फट्॥ गायत्र्यक्षराणां वसिष्ठ
भरद्वाज गौतम [illegible] शांडिल्य लोहित गर्ग [illegible] सनत्कुमार सत्य [illegible] जमदग्न्य
त्रि विष्णु [illegible] पुंडरीक [illegible] दक्ष आंगिरस कार्तिकेय [illegible] विश्वामित्र ऋषयः। अ
ग्निर्वायुः सूर्य [illegible] विश्वेदेव पर्जन्य [illegible] मित्रावरुण [illegible] मरुत्व [illegible]
[illegible] विश्वेदेव [illegible] सविता देवता। गायत्र्युष्णिगनुष्टुब्बृ
हतीपंक्तिः त्रिष्टुब् जगती [illegible] विराट् [illegible] कात्यायनी [illegible] पंक्ति
[illegible] कात्यायनी जगती जगती मही [illegible] सत्यगायत्र्यः छंदांसि उदा
त्ता [illegible] अनुदात्तोदात्ता स्वरिता [illegible] प्रचय [illegible]
[illegible] स्वरिता प्रचया अनुदात्तोदात्ता स्वरिताः स्वराः। अतसीपुष्प पिंगल [illegible] इन्द्रनील [illegible]
स्फटिक विद्युत् [illegible] कांचन [illegible] पांडुर [illegible]

द्युत्सूर्येंदुनीलकुंकुमरक्तावर्णाः। पृथिव्यप्तेजोवाय्वाकाशागंधरसरूपस्पर्शशब्दवाग्घस्तोप
स्थपायुपादश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणिजिह्वासरस्वतीविष्णुरुद्रशिवविश्वरूपाविभूतिस्ताना
विभूतिस्तानागध्यार्न्तिप्री शिपमालयाविलासिनीभल्लुकाः शाख्यः। अइउऋॠऌएऐओ
औअंअः कचटतपयरलवशषसहानिबीजानि। संमुखसंपुटविततविस्तृतद्विमुखत्रिमु
खचतुर्मुखपंचमुखषण्मुखव्यापकांजलिशकटयमपाशग्रथितसंमुखोन्मुखप्रलंब
मुष्टिकमीनकूर्मवराहसिंहाक्रांतमहाक्रांतमुद्गरपल्लवाख्यमुद्राः। पातकनाशनोपपातकनाश
नोपपातकनाशनमहापातकनाशनग्रहरोगशांति ऋणादृत्यानाशन अगम्यागमनपा
तकनाशनाभक्ष्यभक्षणगुरुवधगोवधस्त्रीवध्यवाग्दोषग्रामकौघ्नसर्वजन्मार्जित
पापनाशन पूर्वजन्मार्जितपापनाशनप्रतिग्रहजनितपापनाशनसप्तजन्मार्जितपापना
शनविरिंचिपदप्राप्तिविष्णुपदप्राप्तिरुद्रपदप्राप्तिसायुज्यब्रह्मपदप्राप्तिपरमपदप्राप्त्यर्थं अं ॥३०॥
गुष्ठादिपदन्यासेऽक्षरन्यासे विनियोगः। ॐ तत्पादाभ्यां नमः। सवितुर्जंघाभ्यां० वरेण्यं
कट्यै० भर्गो नाभ्यै० देवस्य हृदयाय० धीमहि कंठाय० धियः मुखाय० यः चक्षुर्भ्यां० नः ललाटाय०

प्रचोदयात् मूर्ध्ने नमः। तत् अंगुष्ठाभ्यां० सवितुस्तर्जन्यै० वरेण्यं मध्यमायै० भर्गः अनामिकायै० देवस्य
कनिष्ठिकायै० धीमहि वामांगुष्ठाय० धियः वामतर्जन्यै० यः वाममध्यमायै० नः वामानामिकायै०
प्रचोदयात् वामकनिष्ठिकायै०। तत्पादाभ्यां० सगुल्फाभ्यां० वि जंघाभ्यां० तुः जानुभ्यां० व ऊरुभ्यां०
रे गुह्याय० णिं वृषणाभ्यां० यं कटिभ्यां० भ नाभ्यै० र्गो उदराय० दे स्तनाभ्यां० व कक्षाभ्यां० स्य
मुखाय० धी तालुने० म नासिकाग्राय० हि भ्रूमध्याय० धि चक्षुर्भ्यां० यो ललाटाय० यो पूर्वान
नाय० नः दक्षिणाननाय० प्र पश्चिमवक्त्राय० चो उत्तरवक्त्राय० द मुखाय० यात् मूर्ध्ने नमः।
ध्यानं। प्रातः संध्यां कुमारीं रक्तांगीं रक्तवस्त्राभरणभूषितां ब्रह्माणीं ब्रह्मदैवत्यां हंसवाहनां कमं
डलुदंडाक्षसूत्रवरकमलहस्तां ऋग्वेदस्तुतिं तीं सत्यलोकात् सूर्यमंडलेस्थयंमंत्रना भ्रूमध्ये
भ्रूमध्यादायांतीं कृष्णचक्षुषे ब्रह्मतेजो बलं बलात् प्राणापानादि तर्यां मिनमाविभ्रांतीं सा हमस्मीति ध्याये
त्। आयातु वितिमंत्रस्य विश्वेदेवा ऋषयः। शाकोदेवता अनुष्टुप्छंदः गायत्र्यावाहने विनियो
गः। आयातु वरदा देवि अक्षरं ब्रह्मसंमितं। गायत्रीं छंदसां मातरिदं ब्रह्म जुषस्व मे। यदह्ना
त्कुरुते पापं तदह्नात्प्रतिमुच्यते। सर्ववर्णे महादेवि संध्याविद्ये सरस्वति। अजरे अमरे
देवि सर्वदेवि नमोऽस्तु ते। ॐ ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामासि वि

ओमसि विश्वायुः सर्वमसि सर्वायुः अभिभूरोम् गायत्रीमावाहयामि ॥ मुक्ताविद्रुमहेमनीलधवल-
च्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्वार्थवर्णात्मिकां । गायत्रीं वरदाभयांकुशकशाः
शुभ्रं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे ॥ इंद्राणी चैव गायत्री ध्यायंतेस्य
तु नित्यशः । सर्वपापपरित्यक्त्यसमग्रं च परमं पदं । ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः
सरसिजासनसन्निविष्टः । केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः
[illegible] गायत्र्यै सांगायै सवाहनायै सपरिवारायै सायुधायै आवाहनादि षोडशोपचारान्सम-
र्पयामि नमः । एतैर्मया कृतैर्मानसैरूपचारैर्गायत्री सांगा सायुधा सुप्रसन्ना वरदा भवतु । उपा-
त्तदुरितक्षयार्थं श्रीपरमेश्वरप्रीत्यर्थं अष्टोत्तरशतसंख्याकं गायत्रीजपमहं करिष्ये । गायत्रीतु-
रीयपादस्य विमल ऋषिः परमात्मा देवता गायत्री छंदः । गायत्रीप्रीत्यर्थे विनियोगः । ॐ परोरु हृदय-
य नमः । ॐ रजसे शिरसे स्वाहा । ॐ असावदोम् शिखायै वषट् । ॐ परो कवचाय हुं । ॐ रज-
से नेत्रत्रयाय वौषट् । ॐ असावदोम् अस्त्राय फट् । सुरभिज्ञानयोनी च मत्स्यः कूर्मोथ
पंकजं । लिंगं निर्वाणमुद्रा च अष्टमुद्राः प्रकीर्तिताः । दशायै वा जपेत् । एवमष्टोत्तरशत ॥३१॥
गायत्रीं जपेत् । षडंगन्यासं कुर्यात् । अथ मुद्रालक्षणं । संमुखं संपुटं चैव विततं विस्तृतं तथा ।

द्विमुखं त्रिमुखं चैव चतुःपंचमुखं तथा । षण्मुखाधोमुखं चैव व्यापकांजलिकं तथा । शकटं यमपा-
शं च ग्रथितं संमुखोन्मुखं । प्रलंबं मुष्टिकं चैव मत्स्यः कूर्मो वराहकौ । सिंहाक्रांतं महाक्रांतं मु-
द्गरं पल्लवं तथा । एता मुद्राश्चतुर्विंशा गायत्र्याः सुप्रतिष्ठिताः । संमुखं संहतौ हस्तौ समौ कुंचितां-
गुली । कुंचिता वक्रा अंगुलयो ययोस्तौ संमुखं नाम मुद्रा ॥ संपुटं पद्मकोशाभौ करावन्योन्य-
संहतौ । पद्ममुकुलाभौ करौ संहतौ हस्तयोः संपुटं नाम मुद्रा ॥२॥ विततं संहतौ हस्तावुत्तानावा-
यतांगुली । आयताः प्रसारिताः अंगुलयो ययोर्हस्तयोस्तौ विततं नाम मुद्रा ॥३॥ विस्तीर्णं सं-
हतौ पाणी मिथो मुक्तांगुली हृदि । मुक्तांगुली हृदये पाणिभ्यां तौ मिथः संहतौ विस्तीर्णं
नाम मुद्रा ॥४॥ संमुखासक्तयोः पाण्योः कनिष्ठाद्ययोगतः । शेषांगुलीनां वैरल्ये द्विमुखत्रि-
मुखादयः । संमुखासक्तयोः पाण्योः कनिष्ठाद्ययोगेन शेषांगुलीनां वैरल्ये अंगुष्ठद्वय-
मात्रमनामिकांतं यावत् द्विमुखं त्रिमुखं चतुर्मुखं पंचमुखानि नाममुद्रा भवंति । तत्र
वकारं द्विमुखं [illegible] ॥५॥ रेकारं त्रिमुखं ॥६॥ णिकारं चतुर्मुखं ॥७॥ यकारं पंचमुखं ॥८॥
शेषांगुलीनां संयोगात्स्वर्योगविनाशने । तिर्यक्तु पुष्पमानाथो संपुटांगुलिमंडलौ । हस्तौ

षण्मुखमिति मुक्ता आस्यविन्यासे॥ सूर्ययोगः कनिष्ठाद्यंगयोगः तद्विनाशोनेतरांगुलीनां संयो
गत्व तिर्यक्संमुख्यमानमग्रं ययोस्तथा संमुखमंगुलिमंडलं च ययोस्तौ हस्तौ षण्मुखं नाम
मुद्रा॥९॥ आकुंचिताग्रौ संमुखौ हस्तौ तु अवाङ्मुखं। ईषद्‌कायाग्रावधोमुखौ संमुखौ
हस्तावधोमुखं नाम मुद्रा॥१०॥ उत्तानौ तौ हस्तावेव व्यापकांजलिके करौ। तावुत्तानौ संमुखौ
उक्तलक्षणौ करौ व्यापकांजलिकं नाम मुद्रा॥११॥ अधोमुखौ बद्धमुष्टी मुक्तांगुष्ठकौ क
रौ। शकटं नाम मुद्रा सा। मुक्तांगुष्ठौ ययोरुक्तलक्षणयोः करयोस्तौ शकटं नाम मुद्रा। ॥३॥
यमपाशमतः परं। बद्धमुष्टिकयोः पाण्योरुन्नताग्रा तु तर्जनी। कुंचिताग्रान्यया युक्ता तर्ज
न्यान्तु अवकृष्या॥ बद्धमुष्टिकयोः परस्परं उन्नतावनतावस्थितयोः पाण्योः मुक्तानाकुंचिता
ग्रा वामतर्जनी सा अन्यया दक्षतर्जन्या तु अवकृष्या यमपाशं नाम मुद्रा॥१३॥ उत्तानसंधि
संलीनबद्धांगुलिदलौ करौ। संस्थाप्य घटितौ दीर्घौ मुखौ ग्रथितमुच्यते। उत्तानसंधिसु
संलीनानि बद्धान्यंगुलिदलानि ययोः करयोस्तौ तथा कौ तावन्योन्यसंमुखा घटितादीर्घौ
मुखौ ययोस्तौ ग्रथितं नाम मुद्रा॥१४॥ कुंचितोर्ध्वांगुलिर्वामस्थात् दशात् दक्षिणेन मु। ॥३२॥

अधोमुखेन संपुक्तः संमुखोन्मुखमुच्यते। कुंचिताः संबद्धा ऊर्ध्वांगुलयो यस्य स तथा हस्ताद्दशोन दक्षिणेन
करेणाधोमुखेन संयुक्तः संमुखोन्मुखं नाम मुद्रा॥१५॥ उत्तानौ चान्यकोटी च प्रलंबः कपित्थकरौ। उत्ताने
उन्नते च कोटी ययोस्तौ प्रलंबो नाम मुद्रा॥१६॥ मुष्टी चान्योन्यसंयुक्तौ उत्तानौ मुष्टिको भवेत्। अ
न्योन्यसंयुक्तावुत्तानौ मुष्टी मुष्टिको नाम मुद्रा॥१७॥ मीनरूपसंमुखौ नम्रौ मुक्तानामिकनिष्ठिकौ। ऊ
र्ध्वसंमुखवक्राणपत्रशेषांगुलिदलानि ययोस्तौ मीनो नाम मुद्रा॥१८॥ अधोमुखो वामकरस्ताद्दशाद
क्षिणेन तु। पृष्ठदेशे समाक्रांतः कूर्मो नामाभिधीयते। अधोमुखो न्युब्जो वामः सतादृशेन दक्षिणेन पृ
ष्ठदेशे चोपयुक्तः कूर्मो नाम मुद्रा॥१९॥ ऊर्ध्वमध्यो वामभुजः दक्षामध्यांसमाश्रये करे। वराहः कथ्यते। दक्षांस
मपाश्रये करे सति उक्तलक्षणो वामभुजो वराहो नाम मुद्रा॥२०॥ कर्णाश्रितावायतांगुली करौ सिं
हाक्रांतं नाम मुद्रा॥२१॥ तावेव कुंचिताग्रौ हस्तौ महाक्रांतं नाम मुद्रा॥२२॥ ऊर्ध्वं तु विध्यतौ पाणी
मुद्गरो वामतर्जनी। पश्चाद्दशा दक्षिणहस्तेन किंचिदूर्ध्वगतयोः पाण्योः वामतर्जनी दक्षिणहस्तास्या
मुद्गरो नाम मुद्रा॥२३॥ पल्लवो दक्षिणः करः अधोमुखः स्थितो मूर्ध्नि मुद्राणामितिलक्षणं। उ
क्तलक्षणे करे मूर्ध्नि निहिते पल्लवो नाम मुद्रा॥२४॥ अत्र महासंहितोक्तो विशेषः न जानुदर्शये
न्मुद्रा महाजनसमागमे। दर्शयन्ति तदावस्तास्सा विफलं च भवेदिति। इति मुद्राः प्रदर्श्य गायत्रीजपः कार्यः।

ततः षडंगानि कृत्वा विसर्जयेत् ॥ मित्रस्येति चतसृणां विश्वामित्र ऋषिः मित्रो देवता गायत्री छंदः ॥ मित्रो
पस्थाने विनियोगः ॥ ॐ मित्रस्य चर्षणीधृतो वो देवस्य सानसि ॥ द्युम्नं चित्रश्रवस्तमं ॥ अभि यो महिना
दिवं मित्रो बभूव सप्रथाः ॥ अभि श्रवोभिः पृथिवीं ॥ मित्राय पंच येमिरे जना अभिष्टिशवसे ॥ स देवान्
विश्वान्बिभर्ति ॥ मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे ॥ इष इष्टव्रता अकः ॥ अथ शांत्यर्थं जपः ॥ जातवे
दस इत्येकर्चस्य सूक्तस्य कश्यप ऋषिः दुर्गा जातवेदो देवता त्रिष्टुप् छंदः ॥ शांत्यर्थं जपे विनियोगः ॥ ॐ जात
वेदसे० ॥ त्र्यंबकमिति मंत्रस्य वसिष्ठ ऋषिः मृत्युंजयो रुद्रो देवता अनुष्टुप् छंदः ॥ शांत्यर्थं जपे वि
नियोगः ॥ ॐ त्र्यंबकं यजामहे० ॥ समानी व इति संवननः संज्ञानम् अनुष्टुप् शांत्यर्थं जपे विनियोगः ॥ ॐ समा
नी व आकूतिः० ॥ तच्छंयोरित्यस्य शंयुर्विश्वेदेवाः शक्वरी ॥ शांत्यर्थं जपे विनियोगः ॥ तच्छंयोरावृणीमहे० ॥
नमो ब्रह्मण इत्यस्य मंत्रस्य वामदेव ऋषिः लिंगोक्ता देवता त्रिष्टुप् छंदः ॥ शांत्यर्थं जपे विनियोगः ॥ ॐ
नमो ब्रह्मणे० ॥ इति त्रिवारं जपेत् ॥ भद्रं न इत्यस्य विमदोऽग्निरेकपदा विराट् ॥ शांत्यर्थं जपे विनियोगः
ॐ भद्रं नो अपि वातय मनः ॥ ॐ शांतिः शांतिः शांतिः सर्वशांतिरस्तु ॥ प्राच्यै दिशे या च देवता एतस्यां
प्रतिवसंत्येताभ्यश्च नमो नमः ॥ इत्यनेन क्रमेण दिशो नमस्कुर्यात् ॥ नमो गंगायमुनयोर्मध्ये ये च न ॥३३
त्सपो वसंति ते मे प्रसन्नात्मानश्चिरंजीवितं वर्धयंतु ॥ नमो गंगायमुनयोर्मुनिभ्यः ॥ संध्यायै नमः

गायत्र्यै नमः ॥ सावित्र्यै नमः ॥ सरस्वत्यै नमः ॥ सर्वाभ्यो दिग्भ्यो दिग्देवताभ्यो नमः ॥ कामोऽकार्षीन्मन्युरकार्षीन्न
मो नमः ॥ यां सदा सर्वभूतानि स्थावराणि चराणि च ॥ सायं प्रातर्नमस्यंति सा मा संध्याभिरक्षतु ॥ सा नो
संध्याभिरक्षत्वो नमः ॥ यथा शिवमयो विष्णुरेवं विष्णुमयः शिवः ॥ यथांतरं न पश्यामि तथा मे स्वस्ति
रायुषः ॥ तथा मे स्वस्तिरायुषो नमो नमः ॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ जगद्धिताय कृ
ष्णाय गोविंदाय नमो नमः ॥ ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ॥ ब्रह्मण्यः पुंडरीकाक्षो ब्र
ह्मण्यो विष्णुरच्युतः ॥ क्षीरेण स्नापिते देवि चंदनेन विलेपिते ॥ बिल्वपत्रार्चिते देवि दुर्गेऽहं शरणं
गतः ॥ दुर्गेऽहं शरणागतो नमः ॥ आकाशात्पतितं तोयं यथा गच्छति सागरं ॥ सर्वदेवनमस्कारः केशवं
प्रतिगच्छति ॥ सर्वदेवेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं ॥ तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनं ॥ नमो
स्त्वनंताय० ॥ उत्तमे शिखरे जाते भूम्यां पर्वतमूर्द्धनि ॥ ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ देवि यथासुखं ॥
सारं भागीरथी तोयं सारं जाप्यं च वैदिकं ॥ ब्रह्मचर्यं तपः सारं सारं मंत्रावसेवनं ॥ इदं द्यावापृथिवी सत्य
मस्तु ॥ पितर्मातर्यदिहोपब्रुवे वां ॥ भूतं देवानामवमे अवोभिः ॥ विद्यामेषं वृजिनं जीरदानुं ॥ स्कांदे
आत्मपापोपशांत्यर्थं संध्याकालेऽभिवादयेत् ॥ आयुर्विद्या धनारोग्यं प्राप्नोति पुरुषः सदा ॥ अथ

ब्राह्मणानभिवादयेत्॥ अथ प्रातर्होमः॥ प्रत्यवरोहेत्यस्य हिरण्यगर्भ ऋषिः अग्निर्देवता त्रिष्टु
प्छंदः। अग्निप्रत्यवरोहणे विनियोगः। प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वहनः प्रजानन्। प्रजा
पुष्टिं रयिमस्मासु धेह्यथा भवयजमानाय शंयोः। परिसमूहनं। ततः प्राणायामः। उपांशुदुरितक्ष
यार्थं अग्निपुरुषप्रीत्यर्थं प्रातरुपासनहोमं करिष्ये इति संकल्प्य। चत्वारिशृंगेत्यस्य वामदेव ऋषिः
अग्निर्देवता त्रिष्टुप्छंदः। अग्निमूर्तिध्याने विनियोगः॥ चत्वारिशृंगा०॥ इत्यग्निमूर्तिं ध्यात्वा।
विश्वानि न इति तिसृणां आत्रेयो वसुश्रुत ऋषिः अग्निर्देवता त्रिष्टुप्छंदः। अग्न्यर्चने विनियोगः।
विश्वानि नो दुर्गहा जातवेदः सिंधुं न नावा दुरितातिपर्षि। अग्ने अत्रिवन्नमसा गृणानोऽस्माकं बोध्य
विता तनूनां॥ यस्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि। जातवेदो यशो अस्मासु धेहि प्रजा
भिरग्ने अमृतत्वमश्यां। यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं। अश्विनं स पुत्रिणं वीर
वंतं गोमंतं रयिं नशते स्वस्ति॥ इत्यर्चनं। ततो होमः। सूर्याय स्वाहा। सूर्याय इदं न मम। प्रजापतये स्वाहा ॥३४॥
प्रजापतय इदं न मम इति प्रातः। अग्नये स्वाहा। अग्नय इदं न मम। प्रजापतये स्वाहा प्रजापतय इदं न मम।
इति सायं। तत उपस्थानं। अग्ने त्वं न इति चतसृणां। गोपायना लौपायना बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधु